पौषमासः
वर्षम्–६८
तृतीयोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ जनवरी २०१७

ISSN 2249-698X

# भारती

संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | राजस्थाने छन्दःशास्त्रीया विद्वत्परम्परा | डा. सुरेन्द्रकुमारशर्मा | ७ |
| ५ | एक-कथा | डॉ. हर्षदेवमाधवः | ९ |
| ६ | रामकथा भागीरथीकल्पा | डॉ. हर्षदेवमाधवः | १० |
| ७ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १० |
| ८ | गर्भपातः | ऋषिराज जानी | ११ |
| ९ | संस्कृतवाङ्मये गणतन्त्र-गरिमा | डॉ. मधुबालाशर्मा | १३ |
| १० | अविद्याप्रभावनिरूपणम् | डॉ. गीता शुक्ला | १६ |
| ११ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १८ |
| १२ | ग्रन्थपरिचयः | म.म. देवर्षिकलानाथशास्त्री | २० |
| १३ | कर्मफलविवेकः | योगेश कुमारः | २२ |
| १४ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २५ |
| १५ | ''जयतु जयतु राजस्थानम्'' | बद्रीप्रसादशर्मा | २६ |
| १६ | सारसिद्धान्तकौमुद्याः समीक्षात्मकविवेचनम् | धन्नाराम कुम्हारः | २७ |
| १७ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १५ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका







**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

**पौषे मासि सिते दले स्वजनुषा योऽलंचकार क्षितिम्**
**धीमन्तं शुभमेधया च वलितं श्रेष्ठं परिव्राजकम्।**
**स्वज्ञानेन च भाषणेऽतिकुशलं विद्वत्सु सम्मानितं**
**हिन्दूधर्मप्रचारकं मधुतरं वन्दामहे स्वामिनम्।।**

## मासावतरणम्

**पौषे पुष्यति तैलमर्दनकृते सर्वं शरीरं सदा**
**तिल्यं भक्षति यो नरो गुडयुतं सर्वाङ्गपुष्टो भवेत्।**
**विद्वांसः कथयन्ति तैलमनिशं पुष्टिप्रदं वर्तते**
**तस्मात्तैलविनिर्मितानि विधिना खादन्ति सर्वे जनाः।।**


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

पौषमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
जनवरी, 2017
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 3

सम्पादकीयम्

# नेतृणां कदाचरणम्

...✍ पं. प्यारेमोहनशर्मा

एषु वर्षेषु संसदः सत्रं कोलाहलेनैव समाप्तिं याति। अधुनापि प्रचलितं संसदसत्रं तथैव समाप्तिं यास्यतीति संलक्ष्यते। संसदः सत्रावसानस्य केवलं त्रीणि दिनानि अवशिष्टानि इति पक्षविपक्षीयाः सर्वे सदस्याः जानन्ति नहि किमपि कार्यं पूर्णतां यास्यति। नास्ति अयं प्रथमावसरः यदा संसदः उभयोः सदनयोः कार्यमवरुद्धं भविष्यति। विगतनैकवर्षेभ्यः सेयं परम्परा प्रचलति। दौर्भाग्यात् पक्षविपक्षे किमपि दलं भवेन्नाम सदने कोलाहलातिरिक्तं किमपि न जायते। देशस्य दीनतामपाकर्तुं सर्वाणि दलानि वदन्ति परन्तु संसदः कार्यसंचालने प्रतिक्षणं त्रीणि लक्षरुप्यकाणि व्ययीभवन्ति नहि किमपि दलं तद्धनस्य संवीक्षां लेखापरीक्षणं च प्रस्तौति। न प्रधानमन्त्री उत्तरदायित्वं स्वीकरोति न च विपक्षीयो नेता। वर्तमानसत्रस्य सर्वं कार्यं धनावरोधाय (नोटबन्द) समर्पितमस्ति। संसदः बहिः प्रधानमन्त्री कथयति यत् संसदि अहं भाषितुं न शक्नोमि अतः संसदः बहिः जनसभायां वदामि। विपक्षश्च कथयति यत् प्रधानमन्त्री संसदो बहिः प्रत्येकस्मिन् स्थाने वदति परन्तु संसदि नासौ वक्तुं सन्नद्धो जायते। पक्षविपक्षयोः परस्परमारोप- प्रत्यारोपयोर्दुष्प्रभावो जनताया उपरि पतति। विपक्षः संसदः कार्यं कथमपि न प्रचलेदित्येव स्व कर्तव्यं मनुते। सर्वकारोऽपि यदा कदा स्वमनसा उपहाराणा ं(राहत) घोषणां विधाय स्वकर्तव्यं पूर्णं मनुते। परन्तु धनावरोधस्येदं कार्यं महत्तमं वर्तते। अनेन 130 कोटि- भारतीयेष्वेव नापितु विश्वस्यान्यदेशेषु भारतस्य भविष्यत् निश्चितं भविष्यति। एतादृशं विषयं यदा एका व्यक्तिः अथवा सर्वकारो निर्णेति तदा तत्र पूर्णतायाः परिपक्वतायाश्चाभावः सदैव दृष्टिपथमागन्तुं शक्नोति। परन्तु यदा विपक्षोऽपि तस्मिन् कार्ये सम्बद्धो जायते तदा न केवलं पूर्णता आयाति अपितूत्तरदायित्वेऽपि समानः सम्बन्धो जायते। संसदः संचालनस्योत्तर-दायित्वमुभयोः वर्तते। परन्तु अधिकमुत्तरदायित्वं सर्वकारस्य विद्यते। सर्वेषां सांसदानां कृते कार्यं न तर्हि वेतनमपि नास्तीति नियमो रचयितव्यः।

एकस्मिन् दिने यदि सदनं न चलति तदापि जनता-याः षट्कोटिरूप्यकाणि व्ययीभवन्ति। जानन्त्येव सर्वे यत् सम्प्रत्यपि सदनं बाधितं विद्यते। किमत्र कारणं विद्यते। केनापि व्याजेन सदनं न चलति।

भारते विशालं लोकतन्त्रं विद्यते। सप्ततिवर्षेभ्यो लोकतन्त्रं यत्र निर्बाधरूपेण प्रचलति तद् वर्तते भारतं राष्ट्रम्। विश्वस्मिन् विश्वे नहि किमपि राष्ट्रमीदृशं विद्यते। अत्र प्रत्येकं पञ्चवर्षानन्तरं निर्वाचनं जायते। गतदिवसपर्यन्तं यद्दलं शासनं संचालयति तदेव निर्वाचने समागतेऽल्पमते निर्विरोधं सद्यः शासनं बहुमतप्राप्तदलाय प्रयच्छति। स्वयं च विपक्षे तिष्ठति। पक्षयोर्मध्ये लोकसभायां विधानसभायां च विचारविमर्शो जायते। प्रतिपक्षिणः सर्वकारस्य दोषानुद्घाटयन्ति। भ्रष्टाचारं प्रदर्शयन्ति। सर्वमिदं वादविवादरूपेण जायते। श्रेष्ठं कार्यमपि सदोषं घोषयन्ति प्रतिपक्षिणः। तदेतत् सर्वं संप्रति 68 वर्षेभ्यो भारते निरन्तरं प्रचलति। प्रधानमन्त्रिकार्यं विद्यते लोकसभायाः सम्यक् संचालनम्। यद्यपि लोकसभाध्यक्षः लोकसभां चालयति परन्तु प्रधान-मन्त्रिणः उपस्थितिस्तत्रापेक्षिता। लोकसभाध्यक्ष-निर्णयेषु जाते विरोधे प्रधानमन्त्री स्वयं स्वकीय-समुद्बोधनेन शान्तिं स्थापयति। इत्थमेव राज्यसभा-यामुपराष्ट्रपतिः सभाध्यक्षो भवति। सः सदस्यानां सम्बोधनं शृणोति सत्यामावश्यकतायां स्वयं सम्बोधयति शान्तिं स्थापयति सत्यामावश्यकता-

यामत्रापि प्रधानमन्त्रिणः उद्बोधनेन सर्वं कार्यं शान्त्या संचाल्यते।

परन्तु षोडशतमीलोकसभायां सर्वे नियमाः, सदस्यैर्बाधिताः। पक्षस्थाः कमपि नियमं प्रस्तुवन्ति विपक्षीयाः सदस्याः कोलाहलं कुर्वन्ति सदनं परित्यज्य बहिर्गच्छन्ति। प्रधानमन्त्रिणमपि न शृण्वन्ति। अधुनैव एकमुदाहरणं सम्मुखे समागतं सदने पूर्वं कः वदेत्? विपक्षो वाञ्छति यद् राहुलगान्धी महोदयः प्रथमं वदेत् वित्तमन्त्री वाञ्छति स्म पूर्वं स वदिष्यति। जाते विवादे विपक्षेण बहिर्गमनं विहितम्। लोकसभायाः एतादृशीं स्थितिं सम्पूर्णविश्वस्य राष्ट्राणि पश्यन्ति। भारतस्य कृते सम्मानभावोऽपि क्षीणतां याति। अतः सर्वाणि दलानि मिलित्वा विचारयेयुः। सर्वं कार्यं सुचारुरूपेण शान्त्या च प्रचलेदिति मार्गः सर्वैः दलैः सम्यक्तया निर्णेतव्यः तदनुरूपं च आचरणं विधातव्यम्।

**धर्मो रक्षति रक्षितः**

धर्मसंस्थापनार्थाय भगवान् कृष्णो वसुदेवतो देवक्यां जनिमलभत। अत एव मल्लयुद्धे ऊरुभङ्गेन भीमद्वारा जरासन्धवधमकार्षीत्। इत्थमेव महाभारत-युद्धस्यान्तिमे चरणे भीमो दुर्योधनमवधीत्। भीष्मपितामहं हन्तुं स्वप्रतिज्ञां त्यक्त्वा रथाङ्गं नीत्वाऽधावत्। पङ्के निमग्नं रथाङ्गं दृष्ट्वापि अर्जुनेन कर्णवधमकारयत्। अश्वत्थामा हत इत्यसत्य-मुदीरयित्वा द्रोणाचार्य वधमकार्षीत्।

सर्वैरुदाहरणैः सिद्ध्यति यदन्यायिनम् अत्याचारिणं आततायिनं च तत्क्षणमेव मृत्युदण्ड-प्रदानमेव धर्मः। सति सिद्धेऽपराधे धर्मव्याजेन तस्य रक्षणं नोचितम्। आततायिनः प्राणरक्षणं कथमपि नोचितम्। अत एव युद्धे भीष्मपितामहं श्रीकृष्णः अवदत् नास्ति भवतोऽधिकारः मदीयप्रतिज्ञास्मारणस्य। यतोहि भवन्तः शासनदासाः। अत एव सभायां पितामहो भूत्वापि द्रौपद्याश्चीरहरणं मौनं धारयित्वा अपश्यत्। अतो युद्धं परित्यज्य अन्यत्र गच्छन्तु अन्यथा भवद्वधे नास्ति कोऽपि संकोचो मम। कर्णवध-समये श्रीकृष्णः अर्जुनमस्मारयत् प्राणरक्षणभिक्षायैकोऽसौ तेषु महारथिषु अविद्यत ये व्यूहरचनां विधाय एकाकिनमभिमन्युं सर्वे मिलित्वामारयन्। दुर्योधनः सभायां द्रौपदीं निजोत्सङ्गे उपवेष्टुमकथयत्। कर्ण स्तदा तां सर्वभोग्यामसाधयत्। युद्धे परिक्लान्तं भीमं दुर्योधनस्य जङ्घात्रोटनायेङ्गितं चकार। पापं समूलमुन्मूलयितुं तत् सर्वमाचरत् श्रीकृष्णः।

कृष्णस्य नीतिज्ञता तथा नीतिचातुर्यमसाधारणम-विद्यत। कृष्णः मनोविज्ञानं सम्यग् जानाति स्म। मानवमनसः मानवचरित्रस्य च सम्यक् ज्ञानेनैव श्रीकृष्णः मानवसामर्थ्यसीमानमलङ्घयत्। अतिमानवः श्रीकृष्णः पूजनीयः संजायते। अर्जुनः कृष्णस्य शिष्योऽविद्यत। दुर्योधनो बलरामस्य पट्टशिष्यः। उभावेव भगिनीसुतावास्ताम्। न कोऽप्युभयोर्मध्ये भेदं कर्तुं शक्नोति स्म। दुर्योधनस्य दुष्टस्वभावं बलरामो जानन्नपि तदुपेक्षामकरोत्। अत एव स्वभगिन्याः सुभद्राया विवाहः तेन सह कर्तुमैच्छत्। पितृभ्यां सहमतिरप्यधिगता तेन परं कृष्णो न तत् समीचनममंस्त। अत एव अर्जुनेन सह सुभद्रां गुप्तरूपेण प्रैषयत्। सुभद्रारथमचालयदिति कल्पना कृष्णस्य अविद्यत। अत एव बलराम-स्तत् कार्यं स्वीचकार।

अन्ततो गत्वा दुर्योधनः कथमपि पाण्डवेभ्यो राज्य-प्रदानं यदा न स्वीचकार। उभयोर्मध्ये युद्धस्य निश्चयः संजातः। उभावेव सहायतायै कृष्णसमीपे अगच्छताम्। कृष्ण आगमनकारणमपृच्छत् उभौ सहायतायै न्यवेदयताम्। ततः कृष्णः प्रथममर्जुन- मपृच्छत् किं साहाय्यं वाञ्छति भवान्? तावदर्जुनः किमपि कथयेदितः पूर्वमेव दुर्योधनोऽकथयत् पूर्वमहमागच्छम् अतः प्रथममहमेव याचे। कृष्णस्तदा अकथयत् यदहं द्विधा मम

बलं विभजामि। एकतो निःशस्त्रो युद्धाद्विरतोऽहमस्मि। अपरतश्च ममाक्षौहिणी सेना रथाश्वादयः सन्ति। उभावेकेकं गृह्णताम्। अर्जुनः केवलं कृष्णमयाचत दुर्योधनः सर्वं सैन्यबलमयाचत। कृष्णेनोभयोः कृते वाञ्छितं प्रदत्तम्। परन्तु कृष्णः स्वयमजानात् यदहं नाधर्मपक्षं गृह्णामि, पुनरपि तेऽर्जुनमपृच्छन् किमिति भवान् निःशस्त्रं मामयाचत। अर्जुनो विनम्रतया प्रोवाच नाहं किमपि जानामि किन्तु जानामि यत् यस्मिन् पक्षे भवन्तो भविष्यन्ति तस्यैव विजयो भविष्यति यतो हि यतो धर्मस्ततो जयः। भवन्तस्तावत् धर्मरक्षकाः भवता स्वयमेव कथितं–

**परित्राणाय साधूनां विनाशाय च दुष्कृतां**
**धर्मसंस्थापनार्थाय संभवामि युगे युगे।।**

अपरं च भवान् साक्षात् भगवान् वर्तते ''कृष्णस्तु–भगवान् स्वयम्।'' अतः साक्षात् विद्यमानं भगवन्तं विहाय अन्यस्याभिलाषां को मूर्खः कुर्यात्? गीतायां प्रतिपादितमेव–

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**
**तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।**

इति सर्वं परिज्ञाय आधुनिकाः शासकाः शासनं तदनुसारं कुर्युश्चेत् तदैव भारते शान्तिः प्राचीनं गौरवं च समायास्यति। वयं सगर्वं सूचयामः–

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**

अतः सर्वात्मना स्वचरित्ररक्षा विधेया। विद्यालयेषु यदि बालकेभ्यः चरित्ररक्षणं पाठयिष्यामः असत्यभाषणं न कर्तव्यमिति शिक्षां दास्यामः निर्भयतां शिक्षयिष्यामस्तदैव भारते भ्रष्टाचारः समाप्तिं यास्यति। बालकाः असत्यभषिणं पितरं कथयिष्यन्ति भो! पितः! किमिति असत्यं वदति भवान्? किमिति भ्रष्टाचरणेन धनं गृह्णन्ति भवन्तः। एतेन तु अस्माकं सर्वेषां जीवनं चरित्रहीनं भविष्यति। तदा वृद्धावस्थायां भवन्तः कष्टेन जीविष्यन्ति। अतः स्वधर्मपालनं विधातव्यम्। चरित्र–रक्षणं च कर्तव्यमिति।

**हार्दिक शुभकामनाओं सहित :-**

**ए इन्फ्रास्ट्रक्चर लिमिटेड**
निर्माता
**ए.सी. प्रेशर पाइप्स**
तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ फाइबर सीमेंट की नालीदार चादरें
**छत्त एक, लाभ अनेक**
हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

# राजस्थाने छन्दःशास्त्रीया विद्वत्परम्परा

❑ डा. सुरेन्द्रकुमारशर्मा

संस्कृतकाव्यशास्त्रस्याङ्गभूतमेव मन्यते छन्दः-शास्त्रम्, किन्तु छन्दःशास्त्रस्याविर्भावः काव्यशास्त्रा-त्पूर्ववर्त्ती एव प्रतीयते। तथा हि वैदिकमन्त्राणां कृते छन्दःशब्दस्य प्रयोगः सर्वथा प्राचीनः। पाणिन्यादिभिरपि शब्दशास्त्रस्याचार्यैश्छन्दसि बहुलमित्यादिसूत्राणां माध्यमेनेदं प्रमाणीकृतं यद् वेद मन्त्राणामाविर्भावः। अतएव छन्दःशास्त्रस्य प्रवर्तनं कदापि वेदोत्तरकाले नैव स्वीकर्त्तुं शक्यते। वेदमन्त्राः च्छन्दस्सूपनिबद्धा वर्तन्ते अतएव वेदानां रचनातः पूर्वमेव तेषां रचनाकाराणां ऋषीणां प्रज्ञायां च्छन्दस अविर्भावः प्रथममेव समभूदिति विज्ञातुं शक्यते।

परवर्तिनि काले छन्दःशास्त्रस्य परम्परा कालक्रमेण वृद्धिं गता। वेदे प्रामुख्येन अष्टौ च्छन्दांसि वर्तन्ते किन्तु तेषामपि निचृद्-भूरिक पिपीलिकमध्यादिभेदाद् बहुभेदत्वमुपपद्यते। ऋचामपि शक्वर्यष्ट्यत्यष्ट्रि-प्रभृति भेदादनेकभेदतया एषां वैदिकच्छन्दसां समाहारेण त्रिचत्वारिंशदुत्तरशतद्वयमिता भेदाः साम्प्रतमुपलभ्यन्ते वेदवाङ्मये येषामुल्लेखा निरुक्ते प्रातिशाख्येषु च स्थाने स्थाने निर्दिष्टाःसन्ति। लौकिकच्छन्दस आविर्भावो महर्षिवाल्मीकेः रामायणसर्जनान्मन्यते। तथा हि क्रौञ्चवधघटनाया अनन्तरं यदा वाल्मीकेर्मुखात् ''मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः। यत्क्रौञ्च-मिथुनादकेमवधीः काममोहितम्'' इति वाक् निःसृता तदा नूतनश्चायं छन्दसामवतार इति नारदः प्राह।

रामायणेऽनुष्टुप्छन्दस एवास्य बाहुल्येन प्रयोगो दृश्यते। छन्दोऽन्तराण्यपि कालान्तरे एवं पन्थानमुनसृत्य प्रवर्तितानि। अतएव महाभारते पुराणेषु च न केवलमनुष्टुप् एवापितु अन्यान्यपि च्छन्दांसि उपलभ्यन्ते तेनेदं वक्तुं शक्यते यत् पुराणानां रचनाकालं यावत् लौकिकान्यपि च्छन्दांसि सुस्थिराण्यभूवन्। कालान्तरे पिङ्गलाचार्येण छन्दःसूत्रे तत्संकलनं कृतम्। इदं सूत्रकालिकं वाङ्मयमस्ति यद्धि महाभारतोत्तरकाले प्रावर्तत। पिङ्गलसूत्राण्येवावलम्ब्य परवर्ती विद्वान् केदारभट्टः वृत्तरत्नाकरं प्रणीतवान्। वर्तमाने छन्दोज्ञानाय इमावुभावेव ग्रन्थौ प्रामाणिकौ मन्येते।

राजस्थाने संस्कृतसर्जनायां छन्दःशास्त्रीयं विज्ञानं कथं प्रविष्टम् इति विषयेऽत्रत्यैनैतिह्येन विज्ञायते यत् अष्टादशशताब्द्यां वाराणस्यां छन्दःशास्त्रस्य विशिष्टा आचार्यचरणाः श्रीमन्तः रसपुञ्जनामानो विशेषज्ञा आसन्। सम्पूर्णविद्यार्जनाय न कश्चित् योग्यशिष्यस्तद्दृष्टौ समायातः। दैवयोगात् तदानीं हरियाणाप्रान्तान्तवर्त्ती दादूपन्थानुयायी सन्तनिश्चलदासः काश्यां निवसति स्म। सन्तनिश्चलदासः तदा गङ्गातटं प्रययौ यदा रसपुञ्जाख्यास्ते सन्तः गङ्गायां देहविसर्जनाय अवतरिता आसन्।

सन्तनिश्चलदासस्य मुखमण्डलीयं तेजो दृष्ट्वा दिव्यदृष्ट्या च तद्योग्यतां मनस्याकलय्य रसपुञ्जस्तं गङ्गायामेवोच्चैराकारयत्। तस्मै च छन्दःशास्त्रज्ञानं प्रददौ छन्दःशास्त्रस्य निखिलं ज्ञानं गृहीत्वा गुरोस्तस्य परमोपकारं मत्वा निश्चलदासः आत्मानं धन्यम्मन्यमानः पुनः स्वीयावासं प्रत्याजगाम। कालान्तरेऽयमेव निश्चलदासः राजस्थानं समागत्य ईश्वरभक्तौ निरतः सन् लोकान् वेदान्तशिक्षया अध्यात्मं प्रति योजयितुं यत्नशीलो बभूव। अयमेव विद्वान् तदानीं स्वामिनं चन्दनदासं श्रीकृष्णभट्टं च छन्दःशास्त्रं पाठितवान्। परिणामस्वरुपं राजस्थाने छन्दःशास्त्रीयज्ञानस्य प्रवर्तनं प्रारब्धम्।

छन्दःशास्त्रीयं ज्ञानमिदं द्वयोः धारयोः प्रावहत्। एका धारा मुनिचन्दनदासमाध्यमेन प्रवृत्ता अपरा च श्री-कृष्णभट्टमहाभागस्य माध्यमेन। मुनिचन्दनदासमाध्यमेन या धारा प्रवृत्ता सा स्वैशिष्ट्येन सुविख्याता बभूव। मुनि चन्दनदासः छन्दःशास्त्रस्य विशिष्टं ग्रन्थं छन्दो-

विन्मण्डनम् सृष्टवान्। अयं ग्रन्थोऽद्यापि छन्दः शास्त्र-विज्ञानाय पर्याप्तं महत्वपूर्णोऽस्ति। मुनिचन्दनदासस्य परम्परायां वैद्य श्रीकृष्णरामभट्ट महोदयानां पं. गोपीनाथ-दाधीच महाभागानां च नाम चिरस्मरणीयमस्ति । वैद्य श्रीकृष्णरामभट्टमहाभागैः छन्दोगणितम् नामकं ग्रन्थं विरच्य छन्दःशास्त्रीयम् विज्ञानं वैशद्येनोपस्थापितम्। गोपीनाथदाधीचमहोदयैरपि वृत्तचिन्तामणिरिति छन्दः-शास्त्रीयो ग्रन्थो रचितो यो लौकिकछन्दसां ज्ञानाय आधारभूतोऽस्ति। छन्दःशास्त्रस्य प्रवेशद्वारभूतोऽयं ग्रन्थः जयपुरपोथीखानामध्ये पाण्डुलिपित्वेन सुरक्षितोऽस्ति। साधुचन्दनदासस्यैव शिष्याः प्राणाचार्याः लक्ष्मीराम-स्वामिन आसन् ये राजस्थाने दादूमहाविद्यालयस्य संस्थापका भारतवर्षे च आयुर्वेदस्य जनकत्वेन विख्याताः सन्ति। एभिरपि महाभागैः श्रीकृष्णरामभट्ट-महभागानामन्तेवासित्वेन छन्दःशास्त्रमधीतम्। श्री-लक्ष्मीरामस्वामिविरचितः छन्दोऽर्णवः इत्याख्यो ग्रन्थोऽपि छन्दःशास्त्रस्य अद्भुता रचनाऽस्ति। अस्यापि ग्रन्थस्य पाण्डुलिपिः दादूमहाविद्यालये सुरक्षिताऽस्ति।

स्वामिलक्ष्मीरामहाभागानां समकालिका एवासन् पं. मधुसूदन ओझा महोदयाः। एतेऽपि राजस्थानीयेषु छन्दःशास्त्रवित्सु विशिष्टा अवर्तन्त । वैदिका अपि इमे छन्दःसमीक्षा इति नामकं ग्रन्थरत्नं प्रणीतवन्तः। अयं ग्रन्थः प्राकाश्यतां यातः सम्प्रति विद्वज्जनानां ग्राह्योऽस्ति। छन्दःशास्त्रस्यानेकानि सूक्ष्मरहस्यानि अस्मिन् सन्निहितानि वर्तन्ते। एतत्परवर्त्ती विद्वान् भट्टमथुरानाथः शास्त्री कविकलानिधिश्रीकृष्णभट्टस्य वंशपरम्परायां छन्दःशास्त्रविज्ञत्वेन सुप्रसिद्धोऽभवत्। अनेन हि विदुषा अनेकेषु लौकिकालौकिकेषु भाषान्तरच्छन्दस्वपि प्रभूता रचना विधाय छन्दोयोजनायां स्वीयं वैदुष्यं प्रख्यापितम्। कविकलानिधिकृष्णभट्टप्रणीतस्य वृत्तमुक्तावली नामकस्य छन्दोग्रन्थस्य व्याख्यासहितं सम्पादनमप्यनेन विहितम् आसीत्।

तत्समसामयिकेषु विद्वत्सु पं. सीतारामभट्ट-पर्वणीकरमहोदयानामपि नाम उल्लेखनीयमस्ति। अयमपि विद्वान् छन्दःप्रकाशनामकं ग्रन्थं सृष्टवानासीत्। डॉ प्रभाकरशास्त्रिमहोदयेन स्वीये शोधप्रबन्धेऽस्य निर्देशो विहितः। अस्मिन्नेव कालखण्डे जगन्नाथनाम्नः कस्यचिद् विदुषः शिष्यपरम्पराऽपि छन्दःशास्त्रस्य प्रणयने तत्परा आसीत्। अयं जगन्नाथः क आसीदिति तु न विज्ञायते किन्तु मधुसूदन ओझा महोदयेन अस्याचार्यस्य जगन्नाथसूत्रनामकः ग्रन्थः स्मृतः छन्दःशास्त्रीय-रचनात्वेन। एवं चेत् अस्य महत्त्वं स्वीकर्तुं शक्यते। अस्य परम्परायां हरिनन्दनकाव्यतीर्थमहाभागः पं. कृष्णलाल-शास्त्री महाभागश्च उभावेव ख्यातनामानौ जयपत्तनीय-विद्वांसौ अभूताम्। अनयोः हरिनन्दन काव्यतीर्थेन कुण्डलीच्छन्दसि बहूनि संस्कृतकाव्यानि रचितानि। एवमेव पं. कृष्णलालशास्त्रिणा अष्टपदीच्छन्दसि अपि काव्यरचनाःकृताः।

राजस्थाने विंशति शताब्द्या उत्तरार्द्धे छन्दःशास्त्रीया विद्वत्परम्परा क्रमेण स्खलनं प्राप्तवती। सम्प्रति नूतनच्छन्दसामुपकल्पनायां नूतनच्छन्दोरचनायां च विदुषां प्रवृत्तिः स्थगिता एवास्ति। वर्षेभ्यः पूर्वं राजस्थानविश्वविद्यालयसंस्कृतविभागाध्यक्षैः डॉ. शिवसागर-त्रिपाठिमहोदयैः प्राणाहुतिनाटके शिवनामकस्य नूतनस्य छन्दसः प्रणयनं कृतमासीत् किन्तु तदनन्तरं न कस्यापि विदुषः प्रयासोऽलक्ष्यत। एवमेव डा. हरिराम आचार्याणां गीतयोऽपि नूतनगीतिच्छन्द-सामुपस्थापनायै पर्याप्तमाधारमुपस्थापयन्ति किन्तु छन्दःशास्त्रीयो विद्वानेव तत्र लक्षणनिर्धारणं कर्तुं शक्नुयात्। वर्तमाने साहित्यसर्जना तु यथाकथंचित् भवत्येव किन्तु सैव यदि छन्दोवैशिष्ट्येन सम्भवेत् तदा तु प्राक्तनी एव सरणिः गौरवं प्राप्नुयादिति शम्।

**प्राचार्यः**
**श्री दादूआचार्यसंस्कृतमहाविद्यालयः**
**जयपुरम्।**

**नूतनकाव्यपृषता:**

# एक-कथा

❑ डॉ. हर्षदेवमाधव:

एक: शृगालो
नद्या निम्नप्रदेशे
जलं पिबति स्म।
तदा
उपरिभागे जलं पिबन्
व्याघ्रोऽब्रवीत्,
'त्वया मुखेन दूषितं जलं मां प्रति प्राप्तम्।
अहं त्वां खादिष्यामि।' प्रत्युदतरत्
शृगालो नम्रीभूय प्रत्यवदत्,
'स्वामिन् ! अहं तु
निम्नभागे जलं पिबामीति।'
व्याघ्र: किञ्चिद् विरम्यावदत्,
'न हि, तव पूर्वजा
उपरिभागे जलं निपीय
जलमदूषयन्।
अतस्त्वां तेषामपराधात्
खादिष्यामि।'
अधुनापि
व्याघ्रा:
अतीतं स्मृत्वा
अस्मान् खादयन्ति सदयम्।

## सहानुभूतेरत्याचार:

यूयं
स्वलघुकं व्रणं विस्तारयितुमालिखथ तम्।
सञ्चारमाध्यमानि
भवतां व्रणं
छायाचित्र-सहस्रेषु प्रसारयन्ति,
भवतां व्रणो भवति
वृत्तपत्रशीर्षस्था: पङ्क्तय:।
धर्मं, समाजं, राष्ट्रं
गर्हितुं कदम्बायन्ते
विश्वदेशा:, विश्वधर्मा:।
वृक-कुलानि
लाभांशं प्राप्तुं
सहानुभूतिधारा: प्रवाहयन्ति।
सर्वत:
सहस्रधारासु
अभिद्रवति
धनराशिर्भवतां क्षतिपूर्त्यर्थम्।
तथापि असन्तुष्टा यूयं
पुरातनं दु:खगानं
दु:खेन गायथ।
सर्वत्र
सहानुभूतेरत्याचारेण
समग्रं राष्ट्रं
क्षूद्रतां नीत्वा
तोषमनुभवथ
प्रियवरा: !
इदमपि शोषणमस्ति
सहानुभूत्या कृतम्।

८, राजतिलक बंग्लोज, आबादनगरम्,
बस-स्टॉप समीपे, पेट्रोलपम्प निकटे, बोपल,
अहमदाबाद-३८००५८

मुरारिबापुसूत्राणि

# रामकथा भागीरथीकल्पा

❑ डॉ. हर्षदेवमाधवः

रामकथा नैकसन्दर्भयुक्ता भागीरथीकल्पा वर्तते। कस्माद् वयं तां प्रणालीमिव कुर्मः। गङ्गा गोमुखात् प्रभवति। सैव गङ्गा अस्माकं श्रद्धामये जगति विष्णोः पादारविन्दात् निर्गच्छति, सैव ब्रह्मणः कमण्डलौ, ततः शिवस्य जटाजूटे त्रिषु धाराषु प्रवहति ततः गोमुखात् गंत्रोत्र्याः गङ्गा भूत्वा प्रवहति। मार्गे अन्याः नैकाः नद्यः तया सह मिलन्ति। अतः लघुका गङ्गायाः धारा गङ्गासागरे गङ्गायमुनासरस्वतीनां सङ्गमं रचयित्वा सागरः भवति। गङ्गायाः मुक्तधारायाम् अनेकाः नद्यः अनेकानि निर्झराणि संगच्छन्ति। तथैव मम रामकथाऽपि गङ्गा वर्तते। तत्र गङ्गासती-गौरांग ठाकर-दुलाभायाकाग-लरिन्द्रदवे सुरेशदलाल-इत्यादीनां गुर्जरकबीनां काव्यपंक्तयः आगच्छन्ति। तथैव हिन्दी-उर्दू-संस्कृत-इत्यादिभाषासु काव्यपंक्तयः आगच्छन्ति। सर्वाः काव्यपंक्तयः रामकथया त्रिवेणीसङ्गमं रचयन्ति। रामकथाप्रवाहं समृद्धं कुर्वन्ति। रामकथाप्रवाहे सर्वमपि प्रवहति।

**एकाग्रचिन्तने कथापारायणश्रवणमाहात्म्यम्**

रामायणकथायाः पारायणं श्रवणं च एकाग्रचित्ते कर्तव्यम्। भगवान् शिवः अमरनाथतीर्थे रामकथां चकार। अमरनाथगुहायां यदा भगवान् शिवः रामकथां चकार तदा केवलं सती पार्वती तां शुश्राव। एकदा पार्वती कथायां 'हम्' इति वक्तुं न शशाक तदा एकः शुकः 'हम्' इति प्रत्युत्तरं ददौ। शिवः क्रुद्धो बभूव। शुकः पलायनं चकार, शिवः तं शुकं ग्रहीतुं तस्य पश्चात् अधावत्। तदा सः शुकः शुकदेवो बभूव। सम्पूर्णं विविक्तं यत्र वर्तते तत्रैव कथा भवति। शिवः शुकदेवस्य 'हम्' इति शब्देन विक्षिप्तः बभूव।

शिवः द्वितीयां कथां कैलाशे चकार। तत्र पार्वती वर्तते, गणेशोऽपि वर्तते, कार्तिकेयोऽपि वर्तते। यदा शिवः पार्वत्यै कथाम् अकथयत् तदा तत्र गणेशोऽपि भवेत्। कार्तिकेयस्य मयूरस्य केकाध्वनिः अपि भवेत्। कैलासस्य कथा गृहस्थेन शिवेन कथिता कथा वर्तते। यदा गृहस्थाश्रमः भवेत् तदा तत्र न कोऽपि विक्षेपः। गृहस्थाश्रमे सर्वप्रत्यवायेषु विद्यमानेषु गृहस्थः धर्माचरणं करोति। अतः मम व्यासपीठे मम पुत्रौ आगच्छतः तदा अहं विक्षिप्तो न भवामि।

यदा मम कथा कैलासे मानससरोवरतीरे आसीत् तदा मम अनुजः पञ्चत्वं गतः। किन्तु कथायाः प्रवाहः न स्थगितः। यतः मम अनुजः कैलासे महादेवस्य छत्रछायायां दिवङ्गतः। शिवस्य कृपया मम स्थितप्रज्ञत्त्वं सुरक्षितम् अभवत्। मया तस्य अन्त्येष्टिसंस्कारे गुर्जरकवेः नरसिंहमेहता इत्याख्यस्य भक्तस्य काव्यं गीतम्। अद्यतनः क्षणो मधुरो वर्तते। आजनी घडी ते रमणीयामणी।

अतः कथायाः पारायणकाले , श्रवणकाले च चित्तस्य एकाग्रता महत्त्वपूर्णा। किन्तु स्थितप्रज्ञता ताटस्थ्यभावं ददाति हर्षशोककाले।

८, राजतिलक बंग्लोज, आबादनगरम्, बस-स्टॉप समीपे,
पेट्रोलपम्प निकटे, बोपल, अहमदाबाद-३८००५८

---

प्रेरकप्रसङ्गशतकम्

षट्चत्वारिंशः प्रसङ्गः

# तपसो महत्त्वम्

❑ मा. श्रीमती आराधना धर्माधिकारी

दुग्धं पीडयत (तापयत) बिन्दुमात्रं दधिक्षेपणाद् दधि भवति, दधिमंथनेन (पीडनेन) नवनीतं जायते, नवनीतं तापयत (पीडयत) घृतं भवति। दुग्धाद् दधि महर्घतामाप्नोति, दध्नो नवनीतं, नवनीताच्च घृतं महर्घं भवति परं चतुर्णामपि वर्णं धवलमेव। अस्यार्थः वारं वारं दुःखं संकटांश्च विषह्यापि यो नरः स्ववर्णं न परिवर्तयति समाजे तस्यैव मूल्यं परिवर्द्धते।

दुग्धमुपयोगि परमेकदिनार्थमेव, ततश्च तद् विकृतं जायते। दुग्धं तापयित्वा बिन्दुमात्रदधिप्रक्षेपणाज्जातं दधि दिनद्वयं स्थास्यति, दध्नो मंथनाज्जातं नवनीतं दिनत्रयं स्थास्यति परं नवनीततापनाज्जातं घृतं न कदापि विकृतं भवति। एवमेव अस्माकं मनोप्यपारशक्तिभिः पूरितमस्ति तस्मिन् सद्विचारान् प्रक्षिपत, स्वजीवनं तापयत। पश्यत भवन्तोपि अजेयाः सर्वदाप्रसन्नाः स्थास्यथ।

ब्रह्मपुरी, जयपुर

लघुकथा-

# गर्भपातः

❑ ऋषिराज जानी

दूरभाषध्वनिः श्रूयते । सुमित्रा सत्वरम् अङ्गणात् मुख्यकक्षं धावति। निश्चितमेव अमरिकादेशात् कनिष्ठ-पुत्रस्य सौरभस्य दूरभाषः स्यात्।

''आम्... पुत्रक ! मानसी स्वास्था वर्तते किम् ? खाद्यपानं समीचीनं भवेदिति आवश्यकम्। तया अतीवश्रमो न कर्तव्यः। अस्मात् मासात् सा स्वस्वास्थ्यं रक्षेति अनिवार्यम्।''

सौरभः दूरभाषेण प्रत्युत्तरं ददाति- ''अथ किम्, अम्ब ! किन्तु भवती अमरिकादेशं कदा आगमिष्यति। अहं एकाकी सर्वामपि व्यवस्थां कर्तुं न क्षमः। कार्यालयसेवा, गृहस्थदायित्वं, मानस्याः परिचर्या। एकाकी एतत् सर्वं कर्तुम् अहम् असमर्थः। भवती शीघ्रमेव आगच्छतु।''

कनिष्ठपुत्रः सौरभः एम.बी.ए. पदवीधारकः आसीत्। अतः स जानाति स्म यत् स्वकार्यम् अल्पशब्दैः कथं सिद्धं भवेत्। स पदवीकौशलस्य मातरि प्रयोगं कृतवान्। सुमित्रायाः दूरभाषशब्दान् तस्याः पतिः विश्वनाथः सावधानम् अशृणोत्। कतिपयक्षणानन्तरं सुमित्रायाः वार्तालापः समाप्तिं गतः।

अमेरिकातः आगतः दूरभाषसन्देशः हिरोशिमानगरे अमेरिकादेशस्य अणुबोम्बविस्फोटवत् प्रतिवारं पतति स्म। तदनन्तरं तादृशी शान्तिर्गृहे प्रसरति स्म। सुमित्रा पाकशालां गत्वा स्वकार्यव्यापृताऽभवत्। किन्तु तस्याः मनसि एक एव प्रश्नः वारं वारं पर्यभ्रामत्। ''अम्ब! भवती कदा आगमिष्यति? भवती सत्वरमागच्छतु।''

सुमित्रायाः द्वावपि पुत्रौ अमेरिकादेशे न्यवसताम्। तस्याः सुताऽपि विदेश एव श्वशुरगृहे आसीत्। सुमित्रायाः पुत्रौ विद्याभ्यासार्थम् अमेरिकां गतवन्तौ किन्तु पश्चात् तत्रैव वृत्तिं लब्ध्वा तत्र स्थायिनौ जातौ।

चतुर्मासपूर्वं यदा सौरभेण सह सुमित्रा दूरभाषेण वार्तालापमकरोत् तदा सा अजानात् 'मानसी गर्भवती जाता इति।' 'गर्भवती' इत्यस्य शब्दस्य श्रवणादेव सुमित्रा-विश्वनाथौ भयविह्वलौ जातौ। गर्भवत्याः शुश्रूषा परिचर्या वा सुमित्रायाः कृते नवीना नासीत्। सुमित्रा स्वपितृगृहेऽपि जेष्ठा पुत्री आसीत्। अतः बाल्यकालादेव सा द्वयोः भगिन्योः च भ्रातुश्च उत्तरदायित्वं निर्वाहयति स्म।

यदा सा विवाहोत्तरं श्वशुरगृहे प्रविष्टा तदा प्रभृति तत्रापि सा वृद्धश्वश्रू-श्वशुरयोः ननान्दृद्वयस्य च दायित्वमपि निर्वाहयितुं प्रारभत। यदा गृहे काऽपि स्त्री गर्भवती भवति स्म तदा सर्वे परिवारजनाः सुमित्रामेव न्यमन्त्रयन्। सुमित्रापि सर्वस्यापि कार्यजातस्य भारं स्मयमानेव अवहत्। सुमित्रैव खाद्य-पान-औषध-शयन-विश्राम-धर्मग्रन्थपठन-चिकित्सक द्वारा परीक्षणप्रभृति सर्वमपि कार्यं सुचारुरूपेण अकरोत्। भगिन्योः ननान्दुः, भ्रातृजायायाश्च गर्भावस्थायां परिचर्यां सैव कृतवती। बहुवारं विश्वनाथः सकोपं अब्रवीत्, ''त्वं कस्मात् ईदृशी साध्वी भवसि। सर्वासां दायित्वं तवैव वर्तते किम् ? स्वस्य स्वस्य परिवारजनाः तासां परिचर्यां करिष्यन्ति।'' किन्तु सुमित्रा प्रत्युत्तरत्, ''अहम् सर्वासु ज्येष्ठा अस्मि। एताः सर्वाः मम पुत्रीकल्पाः। यद्यहं तासां साहाय्यं न करिष्यामि तर्हि का करिष्यति?'' एवमेव सुमित्रायाः यौवनं व्यतीतम्। द्वयोः बालकयोः बालिकायाश्च पालनं-पोषणं-संवर्धनं च कृत्वा सा प्रौढा जाता। पुत्रौ युवानौ जातौ। पुत्री विवाहिता जाता। सर्वेषां विवाहदायित्वं तया पूर्णं कृतम्। पुत्रौ अमरिकादेशे स्थायिनौ जातौ। एकदा ज्येष्ठपुत्रस्य दूरभाष आगतः। ज्येष्ठपुत्रवधूः गर्भवती जाता इति वृत्तान्तं ज्ञात्वा सुमित्राविश्वनाथौ अमेरिकादेशे गतवन्तौ। सुमित्रा सर्वमपि दिवसं पुत्रवध्वाः परिचर्यायां कार्यशीला भवति स्म। जेष्ठपुत्रः सेवाकार्ये व्यापृतः आसीत्। विश्वनाथः किंकर्तव्यमूढः गृहे दूरदर्शनं विलोकयन्नस्थात्।

विदेशे विस्तीर्णा मार्गाः, विशालानि बहुभूमिकानि भवनानि, भव्या विक्रयमहालयाः, उद्यानानि चासन् किन्तु अज्ञातदेशे अपरिचिता भाषा अपरिचिता जनाः, अपरिचितानि स्थानानि-एतेषां मध्ये विश्वनाथः बलात् यथाकथञ्चित् स्वदिवसान् अत्यवाहयत्। विदेशे एकाकित्वं सम्बन्धराहित्यं च सोढुं नाशक्नोत् सः। यदा स

अमरिकादेशात् प्रत्यागच्छत् तदा स सुमित्रायै अवदत्, ''अहं पुनरपि कदापि विदेशे गन्तुं नेच्छामि। अत्र सर्वेऽपि परिचिताः। अहं मम आयुषः शेषान् सानन्दं क्षपयिष्यामि। किन्तु विदेशः मह्यं न रोचते। पुत्रयोः पृथग् विश्वं वर्तते। अधुना आवाम् आवयोः शेषजीवनं यापयेव स्वेच्छया।''

अत्रान्तरे विदेशे निवसन्त्याः पुत्र्याः शुभवार्ता प्राप्ता। जामातुः अत्याग्रहवशात् पुनरपि सुमित्रा अनिच्छया विश्वनाथम् एकाकिनं विहाय विदेशं गतवती। षण्मासानान्तरं सुमित्रा प्रत्यागच्छत्, शरीरेण मनसा च श्रान्ता। सापि कदापि विदेशं न गन्तुं निश्चयमकरोत्। विश्वनाथस्य स्वास्थ्यमपि न समीचीनम् आसीत्। वार्धक्यं स्वस्य कार्यं करोत्येव सर्वथा। विश्वनाथस्य पादयोः सन्धिवातपीडा तं भृशमपीडयत्। तस्मिन्नेव काले सौरभस्य दूरभाषः आगतः। मानसी गर्भवती आसीत् इति ज्ञात्वा सुमित्रा हर्षान्विता जाता, किन्तु विदेशं गन्तुं सा निषेधमकरोत्। सौरभः प्रतिसप्ताहं साग्रहं तां प्रेम्णा वशीकर्तुं प्रायतत। वस्तुतः सौरभस्य सुमित्रायां प्रेमातिशयो नासीत् किन्तु अमरिकादेशे परिचारिका महार्हा वर्तते परिचारिकायै च धनव्ययं कर्तुं सौरभो नाऽभूत् समर्थः। तत्रैव स्थिता भ्रातृजायाऽपि स्वकुटुम्बे भारयुक्ता आसीत्। माता तु प्रेम्णा सुलभा परिचारिका आसीत्। अतः सौरभः स्वब्रह्मास्त्रं प्रायोजयत्, ''अम्ब ! त्वया विना अहं हताशः। मानसी अनाथा। भवती सर्वदा सर्वेषां साहाय्यं करोति। त्वं मामपि निराशं मा कुरु। भवती जानात्येव यन् मानस्याः परिवारात् कोऽपि आगन्तुं न शक्नोतीति। मानसी त्वां प्रतीक्षते।'' पुनरपि षण्मासपर्यन्तं विश्वनाथम् अत्रैव त्यक्त्वा गन्तुं कथं शक्यते? सुमित्रा अद्य सौरभस्य प्रार्थनां श्रुत्वा परवशा जाता। हठात् तां कोऽपि कर्षतीति सा अन्वभवत् क्षणद्वयस्य कृते सा अमरिकादेशः स्वबाहू प्रसार्य तां केशेषु आकृष्य नयतीत्यन्वभवत्।

अत्रान्तरे सा पाचनवातिस्थाया बाष्पस्थाल्याः शीत्कारमशृणोत्। अतः तस्याः स्वप्नभङ्गो जातः। रात्रौ भोजनवेलायां सा विश्वनाथाय सौरभस्य दूरभाषविषये अकथयत्। किन्तु विश्वनाथः दीर्घं निःश्वस्य मौनमधारयत्। तस्य ईदृशं मौनं सुमित्रां व्याकुलामकरोत्। कतिपयक्षणान् यावत् विश्रम्य सुमित्रा अवदत्, ''मया तत्र अनिच्छयाऽपि गन्तव्यं स्यात्,'' कदाचित् तस्मिन् समये सुमित्राया मनसि मातृत्वभूमिका प्रभावकारिणी जाता। तदा विश्वनाथः केवलं वाक्यमात्रेण प्रत्युत्तरम् अददात्- ''अन्येषां कृते आवयोर्जीवनं व्यतीतम्। त्वया सार्धं जीवितुं कतिपयदिवसा एव अवशिष्टाः। तथाऽपि यथा तुभ्यं रोचते...।'' विश्वनाथस्य तीक्ष्ण-वाक्यशरेण तस्याः हृदयं विद्धम्।

कतिपये दिसाः व्यतीताः। विदेशगमनचिटिकां विज्ञां (वीसा) च प्राप्य सुमित्रया गन्तुं यात्रामञ्जूषा सज्जीकृता। गमनदिवसोऽपि सम्प्राप्तः। टेक्षीयानेन (टैक्सी) विश्वनाथः सुमित्रां विमानपत्तनं प्रापयितुमगच्छत्। टेक्षीयानात् निर्गत्य सुमित्रा बहु वक्तुकामा आसीत्, ''औषधं यथाकालं गृह्णातु। लक्ष्मीः (परिचारिका) भवतः कृते भोजनं सिद्धं करिष्यति। उष्णभोजनं कर्तव्यम्। शीतकाले बहिर्न स्थातव्यम्। सोपानपक्तिं शनैः शनैः अवरोहतु। यदि पादयोः पीडा भवेत् तर्हि पीडान्तकं तैलं न विस्मरतु। यदि आवश्यकता भवेत् शीघ्रमेव चिकित्सालयं गन्तव्यम्।...'' किन्तु विमानपत्तनस्य कोलाहले तस्याः शब्दाः तस्या मनसि एव शमिताः सा मञ्जूषया सह अन्तः प्रवेष्टुं पङ्क्तौ अतिष्ठत्। क्षणद्वयं यावत् सा विश्वनाथं अनिमेषदृष्ट्या व्यलोकयत्, अपि च विश्वनाथोऽपि तथैव तां स्थिर दृष्ट्या व्यलोकयत्।

'महाशये! अग्रे चलतु। भवत्या मञ्जूषायाः परीक्षणं सपूर्णं जातम्। अग्रे सरतु।' विमानपत्तनकर्मकरः तां सावधानामकरोत्। सुमित्रा कतिपयक्षणान् यावत् स्थातुकामा आसीत्। अमरिकादेशः स्वार्थस्य बाहुं प्रसार्य तां केशेषु आकृष्य स्वं प्रति नयति स्म। सा अग्रे अगच्छत्। काचद्वारं पिहितं जातम्। अधुना बहिः स्थितः विश्वनाथोऽपि दूरं गतः। सा गर्भवतीं पुत्रवधूं मिलितुं गच्छति स्म- स्वात्मनः सर्वेच्छानाम्, सर्वसङ्कल्पानाम् कृत्वा गर्भपातम्। स्वेच्छानाम् गर्भपातपीडां सैव अजानात्।

८, राजतिलक बंग्लोज, आबादनगरम्,
बस स्टोप समीपे, बोपल, अमदाबाद-३८००५८

# संस्कृतवाङ्मये गणतन्त्र-गरिमा

❑ डॉ. मधुबालाशर्मा

26 जनवरी 1950 तमे वर्षे भारतदेशः विश्वस्य मानचित्रे स्वतन्त्रप्रभुसत्तासम्पन्नगणतन्त्ररूपेण प्रकटितोऽभवत्। गणतन्त्रं प्रजातन्त्रं लोकतन्त्रं वा कथ्यते। अस्मिन् शासने जनता एव जनतायाः कृते शासनं करोति। यथा ''भारतमातरं ब्रूते'' इति महाकाव्ये डा. हरिनारायणदीक्षितमहाभागेन गणतन्त्रस्य अवधारणां प्रकटयता कथितं–

**देशेऽद्य नो शासनमस्ति राज्ञां।**
**स्ववंश-सम्पत्ति-बलोर्जितानाम्।।**
**प्रजाः प्रजा अद्य तु तद्धितार्थं**
**प्रजाज्ञया शासति सेविकावत्**
**प्रजाधिकारात्मक शासनेऽस्मिन्**
**प्रजाहितं काङ्क्षति नेतृवर्गे।**

अस्मिन् श्लोके कविना वर्णितं यद् अद्यत्वे भारतदेशे नैव स्ववंशसम्पत्तिशक्त्या गर्वीभूतानां नृपाणां शासनम् अपितु प्रजातान्त्रिकं शासनं वर्तते, जनता एव जनतायाः हितकामनया जनतायां सेविकावत् शासनं करोति। प्रजातान्त्रिकशासनेऽस्मिन् नेतृणां माध्यमेन प्रजाहितं काम्यते।

अत एव गणतन्त्रात्मके उत वा लोकतन्त्रात्मके शासने प्रजा एव सर्वोपरि भवति। 'भारतायनम्' इति काव्ये वर्णित मस्ति– ''लोकतन्त्रे प्रजा देवः लोकतन्त्रे प्रजा नृपः।''

गणतन्त्रस्यावधारणा वैदिककालादेव प्रचलितास्ति। वैदिकसंस्कृतसाहित्ये पराम्परागतराजन्त्रस्य तथा च निर्वाचनपद्धतियुक्तगणतन्त्रस्य इति प्रकारद्वयस्य शासकीयतत्त्वानाम् उल्लेखः प्राप्यते। एकतः मनु-इक्ष्वाकु-ययाति-भरतसदृशख्यातराजतन्त्राणां वर्णनं वर्तते अपरतश्च ऐतरेयब्राह्मणे हिमालयस्य समीपे दक्षिणदिशायाम् उत्तरकुरु तथा च उत्तरमद्र इति गणतन्त्रीयशासनपद्धति युक्तानां राज्यानाम् उल्लेखोऽस्ति।

ऋग्वेदेऽपि प्रजातन्त्रस्य स्पष्टः संकेतः प्राप्यते। तत्र कथितमस्ति यत् प्रजा स्वयमेव राष्ट्रे शासनं कुर्यात् तथा च समाजशासनं समाजमाध्यमेन समाजस्य विकासाय भवेत्। ''**प्रियः प्रजानां भूयासम्**''2 इत्यनेन प्रकटी भवति यद् ऋग्वैदिक युगे प्रजा-माध्यमेन शासकस्य निर्वाचनस्य तथ्यानि विद्यमानानि सन्ति यथा– ''**विशस्त्वां सर्वा वांछन्तु**'' एतदनुसारं सम्पूर्णप्रजाः संयुक्तरूपेण संयुज्य एव नृपस्य चयनं कुर्युः। अनेन ज्ञायते यद् वैदिक कालेऽपि गणतन्त्रीय शासनप्रणाली आसीत्।

वैदिकसाहित्यवर्णनानुसारं पुरातनकाले जनपद-शासनस्य सभा तथा च समिति नाम्नी संस्थाद्वयम् आसीत्। अथर्ववेदे एते प्रजापतेः दुहितारौ कथ्येते। यथा– '**प्रजापतेर्दुहितरौ संविदाने।**'3 वर्णिता एषा संस्थाद्वयी संविदानरूपेण अर्थात् परस्परं संयुज्य एव कार्यं करोति स्म। वर्तमानकाले संसदो लोकसभा तथा च राज्यसभा इत्यस्य मूलरूपं इत एव प्राप्यते इति कथयितुं शक्यते। अथर्ववेदे नृपनिर्वाचनपद्धत्याः प्रतिपादनम् इत्थमस्ति–

**''त्वां विशो वृणतां राज्याय,**
**त्वामिमाः प्रदिशः पञ्चदेवीः।''**

उक्तमन्त्रस्य अभिप्रायोऽस्ति यत् सर्वतः दिग्भ्यः समागताः प्रजायाः प्रतिनिधिगणाः एव राज्यस्य कृते नृपनिर्वाचनं कुर्युः। एषा एव प्रणाली वर्तमाने राज्यसभायाः सदस्यानां निर्वाचने प्रचलिताऽऽस्ति।

पौराणिकपरम्परानुसारं गणतन्त्रस्य शुभारम्भः भगवान् गणेशः कृतवान्। शिवमहापुराणस्य सप्तदशतमे अध्याये वर्णितमस्ति यत् सः गणस्य अर्थात् समूहस्य

ईशः स्वामी वा वर्तते। पुराणेषु लिखितमस्ति यत् भगवान् गणेशः दशवर्षस्य अल्पावस्थायामेव देवसमाजं संयुज्य संघव्यवस्थां स्थापितवान्। अत एव सः गणतन्त्रस्य आदिप्रणेता इति वक्तुं पार्यते।

यद्यपि रामायणकाले राजतन्त्रमेवासीत् तथापि रामराज्यं लोकतन्त्रात्मकं कथयितुं शक्यते यतो हि रामराज्याभिषेकः प्रजया अनुमोदितः आसीत्। महाराजः दशरथः प्रजावर्गस्य सभासदानां च सम्मतिं विज्ञाय एव रामराज्याभिषेकं निश्चितवान्। रामयणस्य अयोध्या-काण्डे प्रतिपादितमस्ति यन् नगरस्य प्रत्येकवर्गस्य सर्वोऽपि जनः रामं नृपरूपेण वाञ्छति स्म। यथा-

**'बलमारोग्यमायुश्च रामस्य विदितात्मनः**
**देवासुरमनुष्येषु सगन्धर्वोरगेषु च।**
**आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा**
**आभ्यन्तरश्च बाह्यश्च पौरजानपदो जनः।।'5**

रामायणकालस्य शासनं जनतामाध्ययेन संचालित-मासीत् तस्मिन्काले पौर-जनपद-निगम-श्रेणी-गणादि नाम्न्यः संस्थाः आसन् तासां संस्थानां प्रतिनिधिभूताः जनाः शासनसंचालनं कुर्वन्ति स्म। एतादृश्यः संस्थाः किष्किन्धानरेशः बाली तथा च लंकाधिपतिः रावणः गणेश्वर इति कथ्यते स्म।

वस्तुतः रामायणकाले गणतन्त्रात्मकं शासनमासीत्। रामायणमहाभारतकाले राजतन्त्रे सत्यपि प्रजातन्त्रस्य महत्त्वं विलोक्यते यतो हि प्रजारञ्जनमेव राजतन्त्रस्य मूलम्। गणतन्त्रस्य राजतन्त्रस्य वा महत्त्वं प्रतिपादयन् महाभारतस्य शान्तिपर्वणि वर्णितं-

**'राजा प्रजानां प्रथमं शरीरं**
**प्रजाश्च राज्ञोऽप्रतिमं शरीरम्' 6**

महाकविकालिदासेनापि स्वसाहित्ये प्रजातन्त्रस्य महत्त्वं प्रतिपादितम्। यद्यपि कालिदाससाहित्ये राजतन्त्रस्यैव प्रचलनं दृश्यते तथापि ''प्रजाहितम् एव सर्वोपरि'' इति यत-तत्र वर्णितमस्ति। रघुवंशे प्रजारञ्जनाय राज्ञो दायित्वं स्पष्टतया उल्लिखितं-

**''यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा।**
**तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्''7**

अभिज्ञानशाकुन्तलेऽपि च एतादृशं राज्ञः स्वरूपं वर्णितं- **''प्रवर्ततां प्रकृतिहिताय पार्थिवः।''** इति अनेन राजतन्त्रेऽपि प्रजातन्त्रस्य महत्त्वं लक्ष्यते। एवमेव उत्तररामचरिते महाकविभवभूतिनापि भणितं यत्-

संस्कृतसाहित्ये द्विप्रकारकस्य राज्यस्योल्लेखः प्राप्यते राजतन्त्रं गणतन्त्रं च। महर्षिपाणिनिनापि अष्टाध्यायां गणसंघयोः चर्चा क्रियते। केवलं गणतन्त्रात्मकं राज्यं 'गण' इति तथा च गणसमूहः संघः इति नाम्ना उच्यते। महाभारतात् पूर्वम् अन्ध-वृष्णि-भोज-कुकुरादीनि बहूनि यादवराज्यानि गणतन्त्रात्मकस्वरूपेण संचाल्यमानानि आसन् स्वयं भगवान् श्रीकृष्णः अन्धक इति संघस्य प्रधान पुरुष आसीत्।

भारते वंशानुगतराजतन्त्रात्मकशासनस्य तथा च आंग्लशासनस्य समाप्त्यनन्तरं लोकतन्त्रात्मक-गणतन्त्रराज्यस्य उदयोऽभवत् यथा इन्दिराजीवनमिति महाकाव्ये कथितमस्ति-

**''राज्ञां वंशक्रमाप्तं विभवपरिचितं राजतन्त्रं विहाय,**
**विश्वे लोकाभिरामं सकलजनमनोमोदनं सद् विकल्पम्।**
**विश्वस्तं सर्वमान्यं बहुमत विधिना सावधिं स्वानुरूपं**
**प्राज्यं यल्लोकतन्त्रं रचितमिति जनैस्तत्र किं हिंसया वै।।''10**

आंग्लशासनस्य समाप्तेरनन्तरं 1947 तमे वर्षे जनवरीमासस्य षड्विंशतिदिनाङ्के भारतदेशे गणतन्त्रात्मकशासनस्य स्थापनाऽभूत्। यथा प्रो. ताराशंकरपाण्डेयस्य शब्देषु- **''आङ्ग्लायत्तः स्वदेशः शमदमनिरतैर्मोचितो दास्यपाशं प्राप्य स्वातन्त्र्य-लक्ष्मीमविचलचरणां नायकैः कर्णधारैः आत्मीयं लोकतन्त्रं सकलजनहितं निर्मितं भारते तत्।''**

त्रैलोक्ये तस्य कीर्ति र्बिबुधजन गणैर्गीयमाना संसारे। डॉ. गोस्वामी बलभद्रप्रसादशास्त्रिमहोदयेन **इन्दिरा-जीवनमिति** महाकाव्ये गणतन्त्रस्यावधारणा एवं प्रकटिता-

**विपिन्नं साम्राज्यं नृपकुलगतं शासनमपि,**
**विधानं विद्वद्भिर्विरचितमद्य स्वार्पितमिदम्।**
**प्रजातन्त्रे राष्ट्रं भवति विधिकांक्षावधि पदं,**
**किमर्थं ते हिंसा जनमतबलेनाप्नुहि जयम्।। 11**

श्रीरामदवेमहोदयेन लोकतन्त्रविषयमधिकृत्य रम्यं काव्यं रचितमस्ति। काव्येऽस्मिन् यत्र-तत्र व्यंग्यमाध्य-मेनापि लोकतन्त्रस्य चाह चित्रणमुपलभ्यते यथा-

**राज्यश्रियं नृपतिबन्धनतो विमोक्तुं**
**संस्थापितुञ्च भुवि लोकतन्त्रम्।**
**नारायणः सुरपतिं धृतसाहसिक्यम्**
**गन्तुं दिदेश भुवनं निजकार्यसिद्ध्यै। 12**

लोकतन्त्रात्मकशासनप्रणाल्यां लोकाः मतपत्र-माध्यमेन एव नेतॄणां निर्वाचनं कुर्वन्ति। जनतन्त्रस्य राज्यलक्ष्मीः लोकानां मतमाध्यमेन एव प्राप्तुं शक्यते। लोकतन्त्रे मतमहत्त्वं सर्वोपरि विद्यते। अत एव दवे-महोदयेन जनतन्त्रलक्ष्म्याः स्तुतिः कृता-

**मताश्रितायै मतपूजितायै मतोद्भवायै मतमण्डनायै।**
**मतार्जितायै मतपोषितायै नतिर्मदीयास्तु मनोरमायै।।**

गणतन्त्रात्मके शासने जनतया अवचितः जनः एव संविधाननियमानुसारेण शासनं करोति। इत्थं पूर्णतः प्रजातन्त्रात्मकं शासनम् एव गणतन्त्रमित्युच्यते।

**राष्ट्रे प्रजातन्त्रविधानबद्धे,**
**दधाति वै लोकमतं महत्त्वम्।**
**एतद् बहुत्वेन विना न कश्चित्**
**सत्ता प्रतिष्ठामधिगन्तुमीशः।। 14**

अनेन स्पष्टं भवति यत् गणस्य तन्त्रम् अर्थात् सम्पूर्णजनसमूहस्य संघस्य वा शासनमेव गणतन्त्रमिति कथ्यते। उक्तमपि च-

**''मताधिकारप्रभवं जनानां**
**युगानुरूपं जनतन्त्रमेतत्।''15**

अनेन श्लोकांशेन प्रतीयते यत् गणतन्त्रात्मकशासने लोकमतस्य महत्त्वं विद्यते। यथा पण्डिता क्षमाराव-महोदया उक्तवती-

**राष्ट्रस्य सार्वभौमत्वं जनतामवलम्बते।**
**संस्थाने राजसत्ता च जनतावशवर्तिनी।16**

भारतदेशे गणतन्त्रस्य स्थितिं प्रकटयन् भारती संस्कृत पत्रिकायाः मुखपृष्ठे सम्पादकैरुच्यते-

**अर्पणं राष्ट्रभक्तानां वीराणां शौर्यमद्भुतम्।**
**भारते गणतन्त्रस्य सुदृढाऽऽधारभूमिका।। 17**

एवं संस्कृतवाङ्मये गणतन्त्रगरिमा निगदितः।

सन्दर्भग्रन्था :-


1. ''भारतमाता ब्रूते'' महाकाव्यम्- 21/2-3
2. ऋग्वेदः - 17/1/3    3. अथर्ववेदः - 7/12/1
4. अथर्ववेदः - 3/4/2
5. वाल्मीकि रामायणम् अयोध्याकाण्डम् - 2/50/52
6. महाभारतशान्तिपर्व - 67/59/61
7. रघुवंशमहाकाव्यम् - 4/12
8. अभिज्ञानशाकुन्तलम्-7/34    9. उत्तररामचरितम्
10. इन्दिराजीवनं महाकाव्यम्- 15/39
11. इन्दिराजीवनं महाकाव्यम्- 15/44
12. राज्यलक्ष्मी स्वयंवरं महाकाव्यम्- 2/1
13. राज्यलक्ष्मी स्वयंवरं महाकाव्यम्- 4/3
14. इन्दिराजीवनं महाकाव्यम्- 16/36
15. इन्दिराजीवनं महाकाव्यम्- 16/1
16. उत्तरसत्याग्रहगीता-39/12
17. भारती संस्कृतपत्रिका - जनवरी 2013



सहायक-आचार्य (साहित्यं) जगद्गुरु-रामानन्दाचार्य- राज. संस्कृत विश्वविद्यालयः, जयपुरम्

# अविद्याप्रभावनिरूपणम्

❑ डॉ. गीता शुक्ला

भारतीयदर्शनेषु अविद्याविषये प्राचीनकालादेव चिन्तनं कृतम्। श्रीमद्भगवद्गीतायां श्रीकृष्णेन स्पष्टमुक्तम्- '**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः**'।

जीवब्रह्मैकतायाम् अविद्या महानन्तरायः अस्ति। यद्यपि अविद्या दुःखस्य हेतुः तथापि अविद्यायाः रम्यस्वरूपे भ्रान्तो जनः परमार्थसत्तामपि विस्मरति।

अविद्यायाः स्वरूपम्- अविद्येयं भ्रम-बन्ध-वासना-मायादिनामभिः वेदान्तदर्शनग्रन्थेषु सदसद्-विलक्षणऽनिर्वचनीयत्वेन निरूपिता च अस्ति।

शङ्कराचार्यः तु इमां नामरूपात्मकनिखिलविश्व-प्रपञ्चप्रसविनीस्वरूपमावृत्य जीवनजगन्मोहिनीं मायामयीं च निर्दिशति।

अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः यस्यां स्वरूपप्रति-बोधरहिताः शेरते संसारिणो जीवाः। (ब्रह्मसूत्र 1/4/3 शा.भा.) आचार्यशङ्करः-

''**अतस्मिंस्तद्बुद्धिरविद्येति**'' (विवेकचूडामणिः)

तत् यद् ब्रह्मवाचकः, न तत् इति अतत् तस्मिन् अतत्वस्वरूपे अनात्मबोधके शरीरे इन्द्रियमनोबुद्धिषु तस्यात्मनो बुद्धिरविद्येति भावः।( ब्रह्मसूत्र 1/3/2)

माया-अविद्ययोःसाम्यम् -

**माया विक्षेपदज्ञानमीशेच्छावशवर्ति वा।**
**अविद्याच्छादयत्तत्वं स्वातन्त्र्यानुविधायि वा।।**

अर्थात् अविद्या आवरणप्रधानमस्ति माया च विक्षेपप्रधानमस्ति।

अविद्या द्विधा-

(1) **शक्तीदमंशचैतन्यस्थिताविद्या विजृम्भते।**
**रागादिदोषसंस्कारसचिवा रजतात्मना।।**

(2) **इदमाकारवृत्त्युक्तचैतन्यस्था तथाविधा।**
**विवर्तते तद्रजतज्ञानभासात्मनाप्यसौ।।**

1. 'इदम्' अंशयुक्ता चैतन्ये स्थिता अविद्या-या रजतोद्बोधितसंस्कारसाहाय्येन रजताकारे परिणता भवति।

2. इदमाकारवृत्या अवच्छिन्ना-रजतग्राहिणी वृत्तिसंस्कारेण सह स्थित्वा वृत्तिरूपे परिणता भवति।

तौ च रजतवृत्तिपरिणामौ स्वाधिष्ठानेन साक्षिचैतन्येनाव्यवधानेन भास्येते तथा च सवृत्तिकाया अविद्यायाः साक्षिभास्यत्वाभ्युपगमे वृत्यन्तरवेद्यत्वा-भावान्नानवस्था। अविद्योपाधिकं सत्त्वं रजतादेरिति। उक्तञ्च -

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।**
**दन्द्रम्यमाणा परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः। कठोपनिषद् 1/2/5**

मानवजीवनस्य प्रत्येका समस्या केनापि रूपेण अविद्ययैव सम्बद्धा वर्तते। अविद्या अनिर्वचनीया। अत एव तस्याः प्रभावोऽपि सर्वथा अनिर्वचनीय एव भवति। स्व-आवरण-विक्षेपशक्तिभ्यां मोक्षमार्गेच्छुकान् जनान् तेषां लक्ष्यात् तथा पातयति यथा ते आत्मस्वरूपं विस्मृत्य अविद्याजन्यव्यापारे निमग्नाः भवन्ति। संसारेऽस्मिन् अनन्त-जीव-जन्म-मरणानि तदविचारिकर्मफलानि। अविद्यायाः आचाराः अद्वैते द्वैतदर्शनम्, अनात्मनि आत्मबुद्धिः, जडीभूतान्तःकरणे चैतन्यप्रतीतिः, परमानन्दस्वरूपाऽऽत्मनि शोक-मोह-भ्रमादि विक्षेप-निक्षेपादयो वर्तन्ते।

अज्ञानेनावृतो नरो मिथ्याभूतं जगत् सत्यमवधार्य यथार्थज्ञानाभावादद्वैतमेव विनाशयति।

**ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः।**
**न भाति नास्ति चाद्वैत इत्यज्ञानविनिश्चयः।**

**पंचदशी 6/246**

वेदान्तशास्त्रं तु परमब्रह्मण एव परमार्थसत्तां प्रतिपादयति, तदभिन्नवस्तूनां मिथ्यात्वं प्रमाणयति। एकमेवाद्वितीयं ब्रह्म इत्यादयः श्रुतयः द्वैताभावोपलक्षितं विशुद्धब्रह्मतत्त्वं बोधयन्ति। नामरूपादिद्वैतदर्शनं तु अविद्योपाधिमन्तरेण कथञ्चिन्न सम्भाव्यते। वस्तुतः ज्ञानविरोधितत्त्वम् अज्ञानमेव कार्यकारणोपाधिः भूत्वा परमात्मनि द्वैतप्रपञ्चम् उपकल्पयति।

अज्ञानमेव आत्मानं जीव-ईश्वररूपेण विभज्य एकस्मिन्नेव अनेकत्वं दर्शयति। इयम् अविद्या एव द्वैतधेनुरिव जीवेश्वर वत्सौ सततं द्वैतात्मकं पयः पायपति। तस्य तस्य परिणामस्वरूपेण स्वस्वरूपविमुखो जीवः सततम् अविद्याप्रभावफलं भुनक्ति।

पञ्चदश्यां द्रष्टव्यमेतत्-

**मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ।**
**यथेच्छं पिबतां द्वैतं तत्त्वं चाद्वैतमेव हि।। 6/236**

अविद्यायाः कोऽपि विलक्षणप्रभावः अस्ति यतः अनात्मभूते वस्तुनि आत्मबुद्धिश्च भवति। वेदान्त-सिद्धान्तः अस्ति यत् जगतः आत्म-अनात्म-रूपेण वस्तुद्वयं विद्यते। तत्र आत्मा चिन्मयः अनात्मा मृण्यमश्चेति। अनात्मा नाम अनृत-जडदुखात्मकं समष्टिव्यष्ट्यात्मकं शरीरत्रयं शङ्कराचार्येण उपदिष्टम्। स्थूल-सूक्ष्म-कारणाख्यः शरीरत्रयविलक्षणः। अविद्याप्रभावेण स्थूलादिशरीरेषु सुखात्मबुद्धिः, भोगेषु अनित्य-पदार्थेषु आसक्तिः शब्द-स्पर्श-रूप-रस-गन्धादिषु अमृतत्त्वम् अनुभूयते।

यावत् अविद्या न निवर्तते तावत् स्वरूपनिर्धारणे अक्षमो जीवः कर्तृत्वभोक्तृत्वाहंकारेण निरन्तरं जगत्प्रवाहे प्रवहति। अविद्यानिवृत्तौ सः स्वरूपमधिगच्छति। उक्तञ्च-

**यदा सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।**
**ईशावास्योपनिषद् 6**

अथर्ववेदे अपि **यत् स्वप्ने अहमश्नामि न प्रातरधिगम्यते।**
**सर्वं तदस्तु मे शिवं नहि तत् दृश्यते दिवा।।**
**7/101/1**

अविद्याप्रभावेण वस्त्वात्मानम् उपेक्ष्य अवस्तौ वस्तुदर्शनरूप-विपर्ययोऽपि भवति। किं नाम वस्तु-यत् स्वज्ञानाज्ञानकाले समानरूपेण सर्वदा तिष्ठति, केनापि न प्रबाध्यते। यथा रज्जुः स्वज्ञानाज्ञानकाले समानरूपेण तिष्ठति। अतः उभयकालविद्यमानत्वेन रज्जुरेव वस्तुतत्त्वम्। एवमेव अविद्या वस्तुतत्त्वमावृत्य अवस्तुन्येव शरीरेन्द्रियमनोबुद्धिरूपाणि भ्रान्त्या वस्तुरूपेण प्रदर्शयति।

श्रीमद्भगवद्गीतायां-

**धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।**
**यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्।।**

इत्थम् अविद्या सदसद्भ्यां विलक्षणाऽनिर्वाच्ये-वास्ति।

अर्थात् अविद्या न सद्रूपा अस्ति न असद्रूपा अस्ति। अपितु एकस्मिन्नेव काले रूपद्वयस्यासंभवात् तस्मात्सर्वतो विलक्षणाऽनिर्वचनीयैव परिभाषिता।

एसो. प्रो. संस्कृत-विभागः
भ.दी.आ.क. स्नाकोत्तर महाविद्यालय,
लखीमपुर-खीरी

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# विदुषां संस्कृते पत्राचारः

संस्कृतविद्वत्सु परस्परं पत्राचारः संस्कृते भवति स्मेति स्मरेयुरेव संस्कृतसेविनः। यदवधि प्रेषणा (डाक) विभागो भारते पत्राणां प्रापणमारभत तदनु पत्राचारः संस्कृतज्ञैर्भूयस्यां संख्यायामारब्ध इत्यपि सुस्पष्टम्। यदवधि संस्कृते पत्रपत्रिकादीनां प्रकाशनं प्रारब्धं संस्कृतपत्रकाराणां प्रयासैस्तदारभ्य तादृशानि पत्राणि पत्रिकास्वपि प्राकाश्यन्त यानि पत्रिकासु प्रकाशितायाः सामग्र्या उपरि विमर्शादिकं प्रास्तुवन्। स्मराम्यहं यत्कस्मिंश्चन कालखण्डे मध्यमापरीक्षासु संस्कृते पत्रलेखनाभ्यासोऽपि परीक्ष्यो विषयोऽभूत्। साम्प्रतं तादृशस्य पत्राचारस्याभ्यासः शिक्षणसंस्थासु शिक्षकैः कार्यते न वेति नावगतम्। यदि कार्येत चेत्तस्य सुविधायै पत्रलेखनशिक्षकाणि पुस्तकानि प्रकाशितानि सन्ति न वेत्यपि नाऽवगतम्। गतशताब्द्याः प्रारम्भे तादृशानि पाठ्यपुस्तकानि प्रकाश्यन्ते स्मेति सुस्पष्टं स्मरामि।

एवंविधं किञ्चन प्रकाशनं स्याद्यत्र सुललिते संस्कृते पत्रलेखनस्य शिक्षणं प्रस्तुतं स्यादिति विचारेण प्रेरितैः कतिपयैर्विद्वद्भिः पण्डितानां पारस्परिकस्य संस्कृतनिबद्धस्य पत्राचारस्य संकलनमपि चिकीर्षितमभूत्। देहलीस्थेन विद्वत्प्रवरेण डॉ. सत्यव्रतशास्त्रिणा तादृशः कश्चन प्रयासः कृतोऽभूत्, जयपुरस्थेन डॉ. शिवसागरत्रिपाठिनाऽपीति स्मरामि। साम्प्रतं कतिपयेषां विदुषां संस्कृतपत्राचारस्य सङ्कलनं कृत्वा ''**विदुषां पत्राणि**'' शीर्षकं प्रदाय तादृशस्य पत्रपूगस्य प्रकाशनं वाराणसीतः प्रो. सूर्यप्रकाशव्यासेन कारितं तच्च पुस्तकं मत्सविधेऽस्तीति सूचयन् प्रसीदामि।

अत्र हि यथोपलम्भं कतिपयेषां विदुषां प्रौढ-प्राञ्जल-संस्कृतनिबद्धानि पत्राणि प्रकाशितानि, येषु बहूनि पद्यबद्धान्यपीति ज्ञात्वा प्रसीदेयुः पाठकाः।

प्राचीनेषु पण्डितेषु विंशशताब्द्याः प्रारम्भे (ऊनविंश्याः शताब्द्या अन्तेऽपि) संस्कृते पत्राचारो भवति स्म किन्तु तादृशानि पत्राणि दुर्लभान्येव। पं. अप्पाशास्त्रिराशिवडेकर पं. गिरिधशर्मचतुर्वेद-प्रभृतिभिः पत्राणि प्रेष्यन्ते स्म किन्तु तेषां संग्रहोऽलभ्य एव। सौभाग्यमेवेदं यत् कतिपयानि तादृशानि पत्राणि म.म.पं. गिरिधर शर्म चतुर्वेदैः संगृहीतान्यभूवन्। तेषु यानि (22) लब्धानि तेषामत्र प्रकाशनं समजनि। तादृशेषु पत्रेष्वेकमूनविंशंशताब्द्या अन्तिमे दशके व्यलेखि श्रीमदप्पाशास्त्रिराशिवडेकरमहाभागेन (सन् 1892 ई.)। अन्यानि विंशशताब्द्याः पत्राणि। पं. गिरिधरशर्मचतुर्वेदतनूजैः डॉ. शिवदत्तशर्मचतुर्वेदैः प्रसादीकृतानि बहूनि पत्राण्यत्र दृश्येरन्। तादृशेषु पं. गिरिधरर्शमचतुर्वेदैः प्राप्तान्यपि पत्राणि सन्ति, डॉ. शिवदत्तशर्मचतुर्वेदमीरजापुरस्थ पं. दुर्गादत्त-उपाध्याययोः परस्परं पत्राचारस्यापि पत्राणि बहूनि सन्ति। आचार्यवेङ्कटाचलैरुज्जयिनीतः शिष्येभ्यः प्रेषितानि बहूनि पत्राण्यत्र मुद्रितानि। तेषां संख्यास्ति 36।

एवंविधानाम् 130 पत्राणां सङ्कलनमिदं स्पष्टं प्रबोधयिष्यति पाठकान् कथं प्राञ्जलशैल्यां पत्राणि विलिख्यन्ते स्म विद्वद्भिः। छात्राणां कृतेऽपि सुमहदुपकारकं भवेदेतादृशं सङ्कलनम्। पर्यन्ते डॉ. शिवदत्तचतुर्वेदाय विद्वद्भिः प्रहितानि पद्यबद्धानि 21 पत्राणि पृथक् प्रकाशितानि। नूतनान् पथः प्रदर्शयन्नयं पत्रसङ्ग्रहः प्रीतिकरः स्यात् सर्वेषां पाठकानाम्।

**विदुषां पत्राणि-सङ्कलनकर्ता प्रो. सूर्यप्रकाश-व्यासः प्रकाः आर्यभाषा संस्थान बी 2/143 ए भदैनी, वाराणसी पृ.सं. 120 पू. 300/-.**

## श्याममनोहराचार्याणामभिव्यक्तिसङ्ग्रहः

सुविदिता हि प्रबुद्धजगति शुद्धाद्वैतदर्शनविचक्षणाः सकलशास्त्रमर्मज्ञाः श्रीमद्वल्लभाचार्यवंशजाः गोस्वामि-श्याममनोहराचार्या यैः शुद्धाद्वैतदर्शनस्य, वल्लभाचार्य- प्रवर्तितस्य पुष्टिमार्गस्य, वैष्णावसंस्कृतेर्बौद्धिकविमर्शस्य च विषयविशेषानवलम्ब्य ग्रन्था अपि व्यलेखिषत, पुस्तकानि प्राकाशिषत, व्याख्यानानि च व्यधायिषत। समये-समये उत्सवादिप्रसङ्गेषु शुभाशंसा अपि तैः प्रेषिताः पत्रादिद्वारा। आचार्यवर्याणामेतादृशीनामभि-व्यक्तीनां ग्रन्थाकारे सङ्कलनं सद्य एव प्रकाशमाप्तं यत्र सिद्धान्त-उत्सव-भक्ति शीर्षकेषु त्रिषु भागेषु तेषां विचारा अभिलिखिता दृश्यन्ते। वैष्णवदर्शनविषयका, जीवन- मूल्यसम्बद्धा वा विचाराः आराधनासिद्धान्तविषयकाश्च विचाराः ''सिद्धान्त'' भागे, विविधाना-मुत्सवानामवसरे प्रेषिताः शुभाशंसा 'उत्सव' भागे, भक्तिविषयिण्यो वाचो ''भक्तिः'' भागे सङ्कलिताः सन्ति। उत्सवावसरेषु संस्कृतनिबद्धानि पद्यानि प्रमुखतस्तैः सुहृद्भ्योऽनुया-यिभ्यश्च प्रेषितान्यभूवन्। तेषामत्र संग्रहो नूतनानायामान् प्रतिनिदधाति। अपरे भागद्वये पुष्टिमार्गप्रचलिता व्रजभाषा हिन्दीभाषा वा प्रयुक्ताऽस्ति। परिशिष्टेऽन्येषामाचार्याणां सैद्धान्तिका विचाराः, मतपत्राणि वा मुद्रितानि। संग्रहस्य नूतनोऽयं प्रकारः प्रमोदयेत् पाठकान्।

**सूक्तित्रय, गोस्वामीश्रीश्याममनोहराचार्याः, प्रका. सहयोग-प्रकाशन मधुसूदन शाह, 14, शिवकृपा, एस.बी.पी. रोड कान्दिवली, मुंबई पृ.सं. 196 निःशुल्क वितरणार्थम्।**

## बालकवितासंग्रहः

संस्कृते बालसाहित्यलेखनोपलक्ष्ये पुरस्कृतः श्री ऋषिराजः जानी सुपरिचित एव पाठकानां, तस्य बालपाठ्यरचनानां तासां समीक्षणस्य च भारत्यां प्रकाशितत्वात्। कवेरस्य नूतनं बालपाठ्यकवितासंकलनं ''**कपिः कूर्दते शाखायाम्**'' शीर्षकवहं सपद्येव प्रकाशमाप्तम्। अत्र हि 35 संक्षिप्ताः, कथोपकथनरूपाः, क्रीडा-गीतरूपाः, प्रहोलिकारूपाः, प्रयाणगीतरूपाः, अन्यविधाश्च सरला बालकाव्यरचना मुद्रिताः सन्ति। सहैव तदनुरूपाणि चित्राणि तत्सम्मुखपृष्ठे मुद्रितानीति बालसाहित्य भाण्डागारं साधु समेधयति संग्रहोऽयम्।

**कपिः कूर्दते शाखायाम्, ले. ऋषिराजः जानी प्रकाशकौ खुश्बू प्रकाशन, अहमदाबाद, श्रीवाणी प्रकाशन राजतिलक बंगलोज, आबादनगर, बोपल ( अहमदाबाद ) पृ.सं. 90, मू. 75/-.**

ग्रन्थपरिचयः

❑ म.म. देवर्षिकलानाथशास्त्री

# वैदुष्यविभूषिता आत्मकथा

संस्कृते स्ववृत्तकथनपरं नाऽस्ति विपुलं साहित्यम्। आत्मकथानाम्ना गद्यसाहित्यस्यैका विधा विभिन्नासु भाषासु सुपरिचिताऽस्ति, ''आटोबायोग्राफीति'' तस्या अभिधानमाङ्गल्याम्। चरितवर्णमपरं गद्यसाहित्यं तु विद्यत एव संस्कृते यथा बाणभट्टादीनां हर्षचरितादयः, किन्तु तादृश्यात्मकथा संस्कृते न सुविदिता यथाऽन्यासु भाषासु सम्प्रत्युपलभ्यते; विशेषतः साहित्यसर्जकानां डॉ. हरिवंशरायबच्चन सदृशानां शृङ्खलाबद्धा आत्मकथाः ('क्या भूलूं क्या याद करूँ' शीर्षकं प्रथमखण्डमारभ्य 'नीड का निर्माण फिर' प्रभृतयश्चत्वारः खण्डाः) यथा सुप्रथितास्तथा न कस्यापि महापुरुषस्याऽऽत्मकथा संस्कृते सुविदिता। एतस्या रिक्तेरद्धुतां समर्हणीयां च पूर्तिं विद्वन्मूर्धन्यानां पद्मभूषण प्रो. सत्यव्रतशास्त्रिणां भागद्वये निबद्धया सुतरामभिनन्दनीययाऽऽत्मकथया सञ्जायमानां वीक्ष्य को नाम संस्कृतज्ञो नाऽनुभवेद्धर्षातिरेकम्? आत्मकथाया अस्या अभिधानमस्ति ''भवितव्यानां द्वाराणि भवन्ति सर्वत्र।'' प्रौढे, प्राञ्जले, सुललिते च संस्कृतगद्ये हृदयावर्जिकया शैल्या आत्मकथायामस्यां यथा तैः स्वकीयं जीवनवृत्तं वर्णितं तेन पाठकानां बहुमुख उपकारः सिध्येदिति स्पष्टीभवति। विश्वजनीनानां संस्कृत-सरस्वती-सेवा-सम्बद्धानामनुभवानां वृत्तमनेन परिचाय्येत। देशे विदेशेषु च कथं शास्त्रिवर्यैः संस्कृतवाङ्मयस्य महिमा प्रासारि, कीदृशश्चास्ति संस्कृतस्य विदेशेषु परिवेश इति तु परिज्ञायेतैव पठकैः (शास्त्रिवर्यैः अध्येतारः पठकशब्देन अध्यापयितारश्च पाठकशब्देन सूच्येरन्निति परोक्षविधया स्वलेखनेन स्वाभिमतं सूचितं प्रतीयते ग्रन्थेषु) सहैव संस्कृते नूतनानां शब्दानां, पाणिन्यागम-परिगृहीता-नामल्पज्ञातानां प्रयोगाणां शैल्याश्चाप्यवगमस्तैः क्रियेत, बह्व्यो नूतना उद्भावना अप्यवबुध्येरन्, साम्प्रतिके परिवेशे किं कर्त्तव्यं संस्कृतसेवकानामित्यपि प्रासङ्गिकतया परिलक्ष्येत ग्रन्थेऽस्मिन्।

''भवितव्यानां द्वाराणि भवन्ति सर्वत्र'' शीर्षक-स्यात्मवृत्तस्य प्रथमो भागः ईशवीये 2015 तमे वर्षे प्राकाशि, द्वितीयो भागस्तु सद्य एव (ई. 2017 वर्षस्यारम्भे) प्रकाशित इति सुमहान् प्रमोदः। ज्ञानपीठपुरस्कारेण, राष्ट्रपति-पुरस्कारेण, साहित्य-अकादमी पुरस्कारेण, पद्मभूषणसम्मानेन च सभाजितैः, देशे विदेशेषु च संस्कृताध्यापन-प्रसङ्गे समादृतानि पदान्यधितस्थिवद्भिः, भारतशासनेन स्थापितस्य द्वितीय-संस्कृताऽऽयोगस्याध्यक्षपदमलङ्कृतवद्भिः 86 वर्ष-वयस्कैः प्रो. सत्यव्रतशास्त्रिभिः दैनन्दिनीरूपेण (डायरी शैल्यां) ''दिने दिने याति मदीयजीवितम्'' शीर्षकवहं यत् स्वकीयानुभववृत्तं पूर्वप्रकाशिते ग्रन्थे वर्णितं तदपि दैनन्दिनी (डायरी) विधायाः संस्कृते नूतनमवतारणं कथयितुं शक्यते। एवंविधेषु प्रणयनेषु शास्त्रिवर्याणां संस्कृतलेखनशैली बहुत्र व्याकरणस्य पाणिन्युपदिष्टानां किन्तु साम्प्रतमल्पज्ञातानां रुचिराणां प्रयोगाणां दिग्दर्शनं कारयति, एवंविधेषु स्थलेषु पादटिप्पणीरूपेण तैस्तस्य परिचयोऽपि प्रत्तः सुतरामुपकारी स्याज्जिज्ञासूनाम्। यथा ''संगच्छते'' इत्यस्य लुङि रूपं ''समगत'' इत्यपि भवेत् ''समगंस्त'' इत्यपीति प्रसङ्गवशात् कित्त्वविकल्पसूत्रं सूचयन् लेखकः पादटिप्पण्यां कथयति (पृ. 243)। पाणिनीयशास्त्रज्ञता सेयं लेखके वंशानुगताऽस्ति। सुप्रथितो विद्वन्मणिर्वैयाकरणाग्रणीः पं. चारुदेव शास्त्री (लाहौर) सत्यव्रतशास्त्रिणः पिताऽऽसीद् यो भाषाविदामग्रणीरभूत्। अस्यामात्मकथायामपि प्रसङ्गवशात् पितृचरणैः सह कृतानां कार्याणां स्मरणं कृतं लेखकेन। तयोः ग्रन्थानां कैश्चन प्रकाशकैः कथमाचरितम् इत्याद्यपि स्मृतमत्र, पुत्रस्य शरच्चन्द्रस्योपनयनसंस्कारादेर्वृत्तमपि, यत्र पूज्याश्चारुदेव-शास्त्रिणोऽभूवन् साक्षिणः।

अत्रैव लेखकस्य कतिपयेषां ग्रन्थानामवतरणस्य वृत्तान्यपि सूचितानि, निबन्धादीनां संकलनपुस्तकादीनां

प्रकाशनस्याऽपि। लेखकस्य सर्वप्रथमं प्रकाशनमासीद् द्वादशवर्षीयेण तेन 15 पद्येषु लिखितं षड्ऋतुवर्णनं यज्जयपुरीये संस्कृतमासिके ''संस्कृतरत्नाकरे'' तत्संपादकेन भट्टश्रीमथुरानाथशास्त्रिणा सन् 1942 वर्षे प्रकाशितमभूत्। तस्य चित्र-प्रतिलिपिरत्र मुद्रिता। तदनु, ''बृहत्तर-भारतम्'' ''बोधिसत्त्वचरितम्'' प्रभृतीनि सर्जनात्मकसाहित्यप्रकाशनानि, वैदिकव्याकरण-श्रीरामचरिताब्धिरत्न-प्रभृतीनामनुवादा:, मानवमूल्या-न्युपलक्ष्य, भारतविद्यामुपलक्ष्य, योरपीय-विदुषां संस्कृतरचना उपलक्ष्य, थाईदेशीयान् संस्कृताभिलेखानुप-लक्ष्य वा लिखितानां विमर्शलेखानां प्रकाशनानि च स्मृतानि।

थाइलैंड-देशे राजगुरुत्वेन शास्त्रिवर्यैर्यत् कार्यं कृतं, तत्रोपलभ्यमानानां भारतीय-संस्कृत्यवशेषाणां यदनुसन्धानं कृतं तद् बहुमूल्यमस्त्येव। तस्य स्मृतीनामनन्तरं सम्प्रति प्रणीयमानानां ग्रन्थानां सूचना, तत: केन्द्रीय साहित्य-अकादम्या यत् सम्मानद्वयमुपायनी-कृतं (1968 ई. वर्षे संस्कृतपुरस्कार:, 2013 ई. वर्षे च महत्तरसदस्यता फेलोशिप) तत्सूचना:, चीन-देशयात्रा-वृत्तम् (2011 ई.), सर्वमिदं पाठकानामुपकाराय स्यादेव।

एवंविधानामात्मवृत्तानां प्राञ्जल-प्रौढ-संस्कृत-निबद्धं वर्णनमात्मकथाविधां संस्कृते स्थापयतीति भागद्वये प्रकाशितोऽयं ग्रन्थो विशिष्योल्लेखमर्हति। अस्मिन् प्रसङ्गवशाच्चित्ताह्लादकारिण्य: कतिचिद् घटना वर्णिता: सन्ति या: संस्कृताध्येतॄणां ज्ञानमेधयेयु:। विद्वच्चर्चाप्रसङ्गेषु शास्त्रिवर्यैर्मेघदूतीयस्य पद्यांशस्य वल्मीकाग्रात् प्रभवति धनु:खण्डमाखण्डलस्येत्यस्य मध्ये समापततो ''वल्मीकाग्र'' पदस्यार्थो वस्तुतो नीलमेघादुद्गच्छतो धनुष: (इन्द्रधनुष:) सूचना-प्रदानेन सम्यगन्वेति, वल्मीकस्यार्थो 'नीलमेघ' इत्यपि भवति इत्यादि प्रसङ्गवशात् सूचितमस्ति। एकदा तै: ''पश्यैतां पाण्डुपुत्राणामाचार्य ! महतीं चमूम्'' इति गीताया: प्रारम्भे पठितस्य श्लोकाधस्यैवमर्थो विवृतोऽभूत् हे पाण्डु-पुत्राणामाचार्य ! एनां महतीं चमूं पश्य !! एवंविधानि वृत्तानि मन: प्रसादकारीणि सिध्येयुरेव।

आत्मकथाया अयं द्वितीयो भाग: समये समये घटितानां घटनानां स्मृतिचित्राणि 156 खण्डेषु (प्रघट्टकेषु) निबद्धानि संगृह्णाति। एषु खण्डेषु पार्यन्तिका: 133 त आरभ्य 155 संख्यावधि 23 खण्डा द्वितीय-संस्कृताऽऽयोगसम्बद्धानां वृत्तानामङ्कनं कुर्वाणा: सुभृशमुपकुर्यु: संस्कृतसेविन इत्यस्माकं विश्वास:। कथं 2014 ई. वर्षे आयोगोऽयं कार्यमारभत, पर्याप्त-सुविधानामभावेऽपि कथं संस्कृतस्य संस्कृतशिक्षायाश्च स्थितिं पर्यवेक्ष्य तस्या वास्तविकमङ्कनं व्यधायि आयोगाध्यक्षेणेति प्रसङ्गेष्वेषु स्पष्टीभवति। अत्रैव प्रसङ्गत-स्तदिदमपि परिगणितं शास्त्रिवर्यैर्यद् भारते बहवस्तादृशा: प्रशासन-सेवाया उच्चाधिकारिणोऽभूवन्, सम्प्रत्यपि सन्ति, ये संस्कृताध्येतार: संस्कृतविद्वांसश्च सन्ति। संस्कृतज्ञा: केवलं संस्कृताध्यापकत्वेनैव सम्मान्यां स्थितिं बिभ्रति, सेयं धारणा सुतरामतथ्या। अत्रैव प्रसङ्गवशादिदमप्युल्लिखितं तैर्यद् गणितशास्त्रे, चिकित्साशास्त्रे, खगोलविज्ञाने, दूरसंचारपद्धतिषु, बुहुषु क्षेत्रेषु संस्कृतस्योपयोगिताऽद्यापि जागर्ति। आयोगस्यास्य प्रतिवेदने संस्कृतशिक्षाया: परिष्काराय बहव: परामर्शा: सन्ति, आगामिनि काले कथं संस्कृतसंवर्धनं राष्ट्रोपकारकं सेत्स्यतीत्यादयो विषया अपि विवृता:। आत्मकथाप्रसङ्गे सेयं स्मृतिपथगा सूचनासामग्री सुतरामुपयोगिनी सिध्येदित्यत्र नास्ति सन्देह:।

इत्थं संस्कृते आत्मकथाविधाया अवतारणां विदधानस्य ग्रन्थद्वयस्योत्तरार्धं प्रतिनिदधानोऽयं द्वितीयो भाग: साहित्येतिहासे विशिष्टं स्थानं बिभृयादिति स्पष्टमनुभवेयु: पाठका:। एतस्य पदार्पणोपलक्ष्ये शतशो वर्धापनवाच: समर्प्यन्ते विद्वद्वर्येभ्य: प्रो. सत्य-व्रतशास्त्रिभ्य:। **''भवितव्यानां द्वाराणि भवन्ति सर्वत्र'' (आत्मकथाया द्वितीयो भाग:) ले. प्रो. सत्यव्रतशास्त्री, प्रकाशक: विजया बुक्स, 1/10753 सुभाष पार्क, गली नं. 3, नवीन शाहदरा, दिल्ली 32 पृ.सं. 322, मू. 895/-.**

# कर्मफलविवेकः

❑ योगेश कुमारः

पंचभूतनिर्मिता वयं क्षणमपि अकर्मकृतो नैव स्थातुं शक्नुमः। अपि च विश्वेऽस्मिन् नैव भवान् एकाकी। कुत्रचिदेकान्ते वर्तमानोऽपि भवान् एकाकी न। यतोहि प्रकृत्याः अविरामसंचारिण्यां विनिमयधारायां व्यक्तेस्तु काचित् स्वतन्त्रा सत्ता एव नासीत्। सुकृताऽसुकृत-परमाणूनां धारा सततं प्रवाहिता वरीवर्तते। तत्र च भवतां शरीरं जलावर्तबुद्बुदोपमं केवलम्। वयं श्वसिमस्तस्मिन् वायुमण्डले, यत्राऽन्येषां विविधकर्मप्रवृत्तानां, प्राणिनां निःश्वास-तति-र्व्याप्ता। एतादृशी अवस्थैव जलस्य, तथाऽन्यान्यभूततत्वस्य च। अस्माकं प्रत्येकशब्द-विचार-चेष्टानां कम्पनतरंगैः सम्पूर्णविश्वं परिव्याप्तं भवत्यनवरतम्।

यदास्माकं स्थूलाऽस्तित्वमेव स्वतन्त्रं न, तर्हिं अस्मत्क्रियाव्यापारपरमाणुमण्डलं तु निजस्वरूपे सीमितं कथं भविष्यति? वयं कस्मिंश्चित् स्थाने देशे, काले वा यां कामपि क्रियां कुर्मः,सा क्रियाऽज्ञातरूपेण अनेकेषां सहयोगमपेक्षते। यथा कोऽपि प्राणी वस्त्रं धारयति, स वस्त्रसूतः (कपाशः)क्षेत्राद् उत्पन्नः, निर्माणागारे प्रापितः निर्मितिक्रियां यावत् विविधप्राणिहस्तेषु प्राप्त-सम्पर्क-वशात् तेषां विचारक्रियाचेष्टानां परमाणुभिः संक्रमितोऽवश्यं बोभवीति। अतस्तेषां प्रभावो भवन-काष्ठासनादिनिर्माणे तत्प्रयोगे, अत एवोक्तं- यथान्नं तथा मनः। कर्मशास्त्रानुसारं पृथ्वी, पर्वताः, नद्यः वनानि, धातवः, जीवानां समष्टि-प्रारब्धतो निर्मीयन्ते। अथ च सर्वकर्मणां समष्टिजगति प्रभावस्तथा कर्मणि समष्टियोगः एकं प्रत्यक्ष -तथ्यं वरीवर्तते।

एतस्माद् विचारयन्तु यत् व्यक्तेधर्माऽधर्माणां फलानि के के लभन्ते? के के च तत्प्रभाविताः भवन्ति?

ते सर्वे प्रभाविताः भवन्ति, ये तस्य सम्पर्के अज्ञातरूपेण अनायासेन चापतन्ति। एतद्विचार-विवेचनाद् वयं पापकर्मफलेभ्यः पापकर्मभ्यश्च किंचिद् असंपृक्ताः भवितुं शक्नुमस्तथा शुभकर्मफलेभ्यश्च वञ्चिताः न स्याम।

अस्तु-साम्प्रतं पुरतः कर्मपरमाणुविनिमयधारायाः उदाहरणानि प्रस्तूयन्ते।

**पितरौ पुत्राश्च –**

यथा पितुः सम्पत्तेर्ऋणस्य वा भोक्ता पुत्रो रगापि सः पुत्रो नैव वंचितः। सर्वाः सन्ततयः स्वपितृकर्मणामपि फलं भुञ्जन्ते। एवमेव पुत्रकृतं श्राद्धमेव केवलं पितरो नैव प्राप्नुवन्ति, अपितु सन्ततिकृतधर्माणां फलान्यपि पितरोऽश्नुवन्ते। यथोक्तं शास्त्रेषु –

**त्रि सप्तभिः पिता पूतः पितृभिः सह तेऽनघ।**

प्रह्लादं प्रत्युक्तेन एतन्नृसिंहवचनेन सिद्ध्यति यत् पुत्रकृतप्रभावेण पितृणामुद्धारो भविष्यत्येव। अपि च एतऽफलं कुलत्रयस्य सप्तमान्तपूर्वजान् अपि प्रभावयति – इति विशेषतो विचारणीयम्।

**पतिः पत्नी च –**

कर्मणो मुख्यदायित्वं कर्तरि एव विद्यते, परन्तु पत्नी पत्युरर्धाङ्गिनी भवति। अतः पत्युर्धर्मपत्न्याश्च सुकृता-ऽसुकृतेषु पत्युर्भागधेयमपि निहितम्। साध्विपत्न्याः पुण्यफलेन पत्युरुद्धारः पुराणेषु प्रथितो बहुधा।

**शासकः प्रजाश्च –**

यस्य शासने प्रजाः धर्मारूढाः अधर्मनिरता वा यादृशानि धर्माऽधर्म-कृत्यानि सम्पादयन्ति, तं शासकमपि प्रजानां धर्माऽधर्मफलान्यंशतः प्राप्नुवन्ति। सम्पत्तेः षष्ठांशवत् धर्माऽधर्मयोरपि दशांशस्य भोक्ता शासकः शास्त्रेषु निर्दिष्टः। एवमेव शासकस्यापि धर्माऽधर्मफलानि प्रजा भुञ्जते।

**भूमिपालः-**

यस्य भूमौ शुभाऽशुभकार्याणि निष्पद्यन्ते, तं भूपतिमपि तत्कर्माशाः लिम्पन्ति। एतस्मादेव यज्ञदानादयः स्वभूमिरूपमेव सम्पादनीयाः। अपि च तीर्थादिषु यात्रिणां सुखसौविध्यमेतस्मादेव सुलम्भयन्ति परोकारिणः।

**गुरुः शिष्यश्च -**

यथा पुत्रः पितुर्बिन्दुसन्ततिरस्ति, तथैव शिष्योऽपि गुरोर्नादसन्ततिः। अतो गुरोः सत्कर्मणा तपस्यादि विधानां फलानि शिष्योंऽशतः प्राप्नोति। अथ च-शिष्यस्य पुण्याऽपुण्यानां भागी गुरुरपि बलाद् भवति। अत एव विचारवन्तो धर्मज्ञाः यस्मै कस्मैचिदपि मन्त्रदीक्षां प्रदाय जनं शिष्यरूपेण नैव स्वीकुर्वन्ति। यथा शिष्यरूपेण सद्गुरोरन्वेषणं कर्तव्यं, तथैव गुरुणापि सत्पात्रमन्वे-षणीयम्।

**आश्रयदाता-**

यथा कस्यापि पुण्यस्य पापकर्मणो वा तत्तत्फलानि आश्रयदातारं लिम्पन्ति, तथैव मानवोऽपि यस्याऽश्रयं प्राप्नोति, सोऽपि तस्याश्रयदातुः तत्तत्फलान्यश्नाति।

**आजीविका- सुविधादाता च-**

यस्यान्नं प्राणी गृह्णाति, यत्सहयोगेन च सौविध्यं प्राप्नोति, तत्पापपुण्यानामपि फलभाक् स तत्प्रापकस्य कर्मफलानि प्राप्नोति। एतस्मादेव विज्ञसाधकः सर्वेषामन्नदानादिकं नैव स्वीकरोति। तीर्थादिषु वस्त्रजलसेवाप्रतिष्ठानानि एतस्मादेव व्यवस्थाप्यन्ते यत् तत्रोपस्थितपुण्यात्मनां फलांशभाजो वयं भवेम।

**स्वामी सेवकश्च-**

एतयोरपि परस्परं कर्मपरमाणूनां विनिमयो भवति। यथोत्तमसेवकमाध्यमेन स्वमिनः प्रशंसा, स्वामिनः यशोऽपयशोभ्यां सेवकोऽपि लिम्पति।

**निन्दकः प्रशंसकश्च-**

भवतः केनापि जनेन सह नैव निकटसम्बन्धो, नैव च सौहार्दम् तथापि तस्योत्तमकर्मणां प्रशंसां, कुत्सितकर्मणां वा निन्दां सहजतया भवद्-गिरति। एतन्-निन्दाप्रशंसाकथनेन श्रवणेन च भवान् तस्य कर्मांशानां फलभाग् भवति। एतत्प्रसंगे एका पुराणकथा अतीव प्रथिता।

राजा स्वप्ने परलोकं गतस्तत्र स्वभक्षणार्थं मलराशिमपश्यत्। प्रातरुत्थाय विद्वत्समाजे तत्परि-मार्जनं अपृच्छत्। तदा तैर्बुधैः तस्योपायत्वेन प्रदर्शितं-यत् हे राजन्! यदि भवतो निन्दां प्रजायां प्रत्येकं जनः कुर्यात् तर्हि तस्य मलराशेर्भाजनानि ते प्रजाजना एव भविष्यन्ति। एवं सति राज्ञा एका ब्राह्मणकन्या गृहे आनीता। प्रकाशे तु तया सह पत्नीवत् आचरितं, किन्तु वस्तुतः पुत्रीवत् व्यवहृतम्। एवं प्रजासु सर्वत्र तस्य राज्ञः निन्दा प्रसृता। पश्चादेकदा पुनः स्वप्ने राज्ञा विलोकितं यत् किंचिन्मलमवशिष्टम्। ततः पुनः पंडितसमाजे तद्रहस्ये विचारिते सति विज्ञापितमिदं यत् प्रजायामेकः साधुर्न निन्दति, तस्मादेव किंचिन्मलमवशिष्टम्। राजा प्रच्छन्नवेशस्तत्र गत्वा स्वनिन्दाप्रसंगं तत्सम्मुखे निगदितवान् यत् हे महात्मन्! पश्य, राजा विप्रकन्यां स्वप्रासादे कुत्सितभावनया आवासयति। तदा साधुर्विहस्य निवेदितवान् - हे राजन्! शेषमलं तु भवतैव भक्ष्यमस्ति। अतः सर्वैरस्माभिर्विचारपूर्वकं परनिन्दा परचर्चा वाऽचरणीया।

अपि च प्रेरकं, सहायकम्, अनुमोदकं चापि अस्मत्- कर्मपरमाणवः संक्रमन्ते। यतोहि कर्ता सदा स्वेच्छयैव कर्माणि न करोति, कदाचित्तु प्रेरक एव कर्मव्यापारेषु मुख्यरूपेण प्रभावी भवति, यथा स्वामिन आज्ञापरवशः सेवकः किंचित् कर्म करोति। एवमेव पितुराज्ञया गुरोराज्ञया च कोऽपि कर्मणि प्रवर्तते,

तदानीमधिकतरं कर्मफलभाक् प्रेरक-एव भवति। एवमेव हिंसकादधिकं तत्प्रेरकः पापभाक्। परोपकारिणोऽपेक्षया तत्प्रेरको विशिष्टः। इत्थमेव तत्कर्मसहायकोऽपि तत्तकर्म-फलान्यंशतो भुङ्क्ते।

**यथोक्तं श्रीमद्भागवते-**

**कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च।**
**कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलम्।।**

(11/27/55)

अपि च-यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् 1/17/22 अतोऽस्माभिर्विचारणीयं यत् अस्मत्कर्मणामेव फलं वयं न प्राप्स्यामः अपितु परेषामपि पूर्वोक्तानां फलांशाः बलादस्मान् लिम्पन्ति। एवमेवाऽस्माकं कर्मव्यापारादपि बहवो जनाः प्रभाविताः भवन्ति। एतस्मात् सदा सत्कर्मप्रवृत्तिरेव श्रेयस्करी। नान्यथा कर्मजालान्मुक्तिः संभवा।

**यथोक्तं चोपनिषदि-**

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।**

(ईशावास्य ०२)

एवं कर्मप्रधानेऽस्मिन् संसारे न तु जनाः निष्क्रियाः क्षणमपि स्थातुं शक्नुवन्ति, नापि ते फलजालेभ्यो मुक्ताः भविष्यन्ति। एतस्मात् सदा सत्कर्मप्रवृत्तिवशादेव अन्ततः स्वतः निष्कामभावना उदेष्यति, तस्मादेव कर्मबन्ध-विमुक्तिः संभवा। अत एवोक्तं शास्त्रेषु-**गहना कर्मणो गतिः।**

**व्याख्याता**
**श्री-दादू-आचार्य-संस्कृतमहाविद्यालयः**
**जयपुरम्।**

**हार्दिक शुभकामनाओं सहित :-**

**राष्ट्रीय विचारों के लिए पढ़ें**

**पाञ्चजन्य Organiser**

**हमारी विशेषताएं**

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

**भारत प्रकाशन (दिल्ली) लि.**

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com

दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

# भारतीमञ्जुनिकुञ्जम्

( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### संस्कृतभारतीशक्तिजागृतिः

ओ लते ! स्वावलम्बः सदा श्रीयतां,
श्वस्यताञ्चात्मशक्त्याधुना हीयताम्।
लम्पटोऽनोकहो रामनारायणि!,
हा कथं भारते आहता भारती।। ३२८।।

### संस्कृतभारतीवृद्धकारोऽहंकारी संस्कृतज्ञः

जारको मातृलालोऽद्य मध्येसभं,
दर्शयन् स्वप्रतिष्ठां सुसम्वर्धयन्।
हुंकृतिं तुंकृतिं भाषमाणस्सदा,
हा कथं भारते भारती आहता।। ३२९।।

### संस्कृसेवकोपेक्षा

सेवमानो हृदोपेक्षितश्चाद्य हा,
रक्ष तं यच्छ शक्तिञ्च तस्मै नवाम्,
शारदे ! धात्रि ! दुर्गे ! शिवे ! कालिके,
हा कथं भारती आहता भारते।। ३३०।।

### विश्वबन्धुत्वकरी मेधाप्रार्थना

प्रार्थये धात्रि ! मेधां प्रयच्छ प्रियां,
सात्त्विकीं कारयित्रीं समानात्मिकाम्।।
विश्वबन्धुत्वस्यूतामये सुक्रियां,
भारती आहता भारते हा कथम्।। ३३१।।

### संस्कृतसरलतायै प्रार्थना

भारते चाद्य सर्वत्र भातु विभे!
सारलीमाश्रयन्ती सदा संवदे।
फुल्लयन्ती शिवत्वं हि मे मानसे,
हा कथं भारती आहता भारते।। ३३२।।

### मम-वेदना

पापठामो लिखामो वदामो न ते,
संचरामस्सपत्नीं वियातत्रपा।
त्वामिवाजामिला धुन्धलीजा सुताः,
हा कथं भारते भारती आहता।। ३३३।।

गौरवं विस्मरामस्समुद्वाहिताः,
प्रेयसीपाशजालैः सिता हृद्रुजा।
मायिकैः वस्तुभिश्चावृता वानराः,
हा कथं भारते भारती आहता।। ३३४।।

### संस्कृतभारती संस्थाकार्यम्

भारतीसंस्थिका ते प्रचारे रता,
केवलं शैविरं ग्रीष्मकाले यदा।
संस्कृतस्याद्य संयोजयन्ती कदा,
हा कथं भारते भारती आहता।। ३३५।।

संस्कृतं भाष्यते यत्नतः शिक्ष्यते,
पाणिपादं विना विक्रियेवोद्यसे।
दृश्यसे त्वं क्षणं हीयसे सम्प्रति,
आहता हा कथं भारते भारती।। ३३६।।

### संस्कृतशिबिरे सहभागिनः प्रशिक्षकाः

वीक्षमाणा हितं तत्र यान्तो निजं,
कुर्वते वायितिश्रीः हि नाम्ने सदा।
भारती पाषका ! चेतसा भो कदा ?
हा कथं भारते भारती आहता।। ३३७।।

**भारत्या-उत्तम-मध्यम-अधम-स्वरूपम्**

सूत्रमुक्तं स्वरूपं विमुक्तं विधि-
भिर्मनोज्ञं रसालं पुरा चोत्तमैः।
शस्तमेतत्सुधासूक्तियुक्तञ्च ते,
हा कथम् आहता भारती भारते।। ३३८।।

आर्जवी ते तनुर्मार्जिता मध्यमैः,
सूत्रसाहित्यलावण्यगन्धैरियम्।
कामिनीकञ्जलास्यास्यवत्क्षालिता,
हा कथं भारते भारती आहता।। ३३९।।

विक्षता तैरहंवादिभिश्चावमैः,
तन्तुभिस्ते क्षता हा शरैः शाब्दिकैः।
वैधिकैर्न्यायपाशैस्तनुस्तिग्मभि,
राहता हा कथं भारते भारती।। ३४०।।

**संस्कृतस्य विस्तारः कथम्**

चीनखेलप्रतिस्पर्धितेवाद्य साऽ-
नन्दझाशिष्यशिक्षेव नः श्रद्धिका।
विष्णुगुप्ताकृताराष्ट्रनिष्ठेव वा,
हा कथं भारते भारती आहता।। ३४१।।

**भारतस्य सर्वस्वं संस्कृतम्**

शोणितं त्वं वपा मेदको मज्जिका,
विग्रहश्चर्म वीर्यं धृती रोमिका।
अन्तरेणाद्य चात्मा न नस्त्वा स्थितिः,
आहता हा कथं भारते भारती।। ३४२।।

**व्याख्याता ( संस्कृतम् )**
**राजकीयकल्याणमहाविद्यालयः, सीकरम्**

# ''जयतु जयतु राजस्थानम्''

❑ **बद्रीप्रसादशर्मा**

**राजस्थानम् राजस्थानम्**
**जयतु जयतु राजस्थानम् ।।**

**शिखरे यस्य शिवालिकमुकुटम्**
**मध्ये अरावली पर्वत माला**
**माह्यायड़ बनास चम्बलौ**
**नित्यं वहतो मधुरजलम्**
**जयतु जयतु राजस्थानम् ।।**

**ऋषि मुनि पोषिता कविगणरचिता**
**पावनपूता मरूधरा**
**ब्रह्मगुप्तकविमाघधन्या**
**ज्ञानं वितरति संस्कृतिगंगा**
**जयतु जयतु राजस्थानम् ।।**

**वीराणां च त्यागेन शूराणां च शौर्येण**
**भूमिरियं सुशोभिता**
**शिक्षा-दीक्षा बुधजनैः पालिता**
**देववाणी संस्कृतभाषा**
**सर्वत्र संचरति सुमङ्गलम्**
**जयतु जयतु राजस्थानम् ।।**

**व. अ. संस्कृत**

# सारसिद्धान्तकौमुद्याः समीक्षात्मकविवेचनम्

❑ धन्नाराम कुम्हारः

जगति प्रवृत्तस्याखिलस्य ज्ञानस्य मूलमस्माकं वेदाः व्याकरणशास्त्रस्याप्यादिमूलम्। महाभाष्यकारेण पतञ्जलिना व्याकरणाध्ययनस्य प्रयोजनानां प्रसङ्गे चत्वारि शृङ्गाः, चत्वारि वाक्, उतत्वः, सक्तुमिव सेवेदाऽसि वरुणः इत्यादिमन्त्राणां व्याख्या व्याकरण-शास्त्रानुसारं कृता। वि उपसर्ग, आङ् उपसर्ग पूर्वकं डुकृञ् करणे धातोः ल्युट् प्रत्ययेन व्याकरणमिति पदं निष्पद्यते। पाणिनिना निर्दिष्टः डुकृञ् इति धातुः यजुर्वेदेऽपि अस्मिन्नेवार्थे प्रयुक्तः समुपलभ्यते।

व्याकरणशास्त्रस्योत्पत्तिः कदाऽभूत् एतस्य प्रश्नस्योत्तरं नियतमिति दातुं न शक्यते। वैदिकपदपाठानां समीक्षया ज्ञायते यत् पूर्वं प्रकृतिप्रत्ययधातूपसर्गाणां समासघटितानां पूर्वोत्तरपदानाञ्च विभागः पूर्णतया पदपाठात् पूर्वकालात् एव निर्धारित आसीत्। आशयो वर्तते यत् व्याकरणप्रक्रियाज्ञानं संहितापाठादनन्तरमेव संजातमासीत्। अतः ते वैदिका विद्वान्सः पदपाठकरणे समर्थाः जाताः। वाल्मीकीयरामायणे हनुमतः वाक्चातुर्यं- ''**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्**'' इति। ''**महाभाष्यस्य पुराकल्प एतदासीत्,**'' ''**संस्कारोत्तरकालं ब्रह्मणा व्याकरणं समाधीयते**'' इति वचनानुसारं प्राचीनकाले व्याकरणस्य पठनं पाठनञ्च प्रचलति स्म। व्याकरणशास्त्रम् इति शब्दस्य प्रयोगः रामायणस्य किष्किन्धाकाण्डे, गोपथब्राह्मणे, मुण्डकोपनिषदि, महाभारतादिषु च समुपलभ्यते। शिक्षा, व्याकरणं, निरुक्तं, छन्दः, कल्पः, ज्योतिषम् एतेषां वेदङ्गानां ''षडङ्ग'' इति शब्दात् निर्देशः गोपथब्राह्मणे, बौधायनधर्मशास्त्रे, गौतमधर्मशास्त्रे, रामायणादिषु ग्रन्थेषु च प्राप्यते। महाभाष्येऽपि ''**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च**'' इत्यागमवचने ''षडङ्ग'' इति पदात् वेदाङ्गानां लभ्यते निर्देशः। व्याकरणशास्त्रस्य प्रथमः प्रवक्ता ब्रह्मा वर्तते। यथा चोक्तम् ऋक्तन्त्रे- ''**ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः**'' इति (ऋक्तन्त्रे) इत्थं व्याकरणं ब्रह्मणैव कृतमिति निर्देशात् व्याकरण-स्याप्यनादिकालत्वं सूचितं भवति।

कस्या अपि भाषायाः ज्ञानाय व्याकरणस्य ज्ञानमत्यावश्यकं भवति। शब्दसाधुत्वप्रतिपादनाय व्याकरणं नितरामपेक्ष्यते। व्याकरणं भाषाप्रवाहं नियन्त्रयति तथा च तस्यां भाषायामुत्पन्नानां दोषाणां समाधानं विधाय भाषायाः शुद्धं परिष्कृतञ्च स्वरूपं प्रदर्शयति। संस्कृतसदृशभाषायाः ज्ञानाय तु व्याकरणस्य ज्ञानं नितान्तमपेक्ष्यते (व्याकरणज्ञानेन विना कोऽपि मनुष्यः न पारयति पाण्डित्यं प्राप्तुम्।) षडङ्गेष्वपि वेदाङ्गेषु व्याकरणं मुखस्थानीयत्वेन प्राधान्यं भजते। उक्तञ्चापि-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

पुराकाले प्रचलिताऽऽसीत् उक्तिरेषा यत् यद्यपि सर्वेषां शास्त्राणामध्ययनं न शक्यते कर्तुं तथापि व्याकरणन्तु पठन्त्वेव। उक्तञ्चापि-

**यद्यपि बहु नाधीषे तथाऽपि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्। इति।**

पाणिनितः प्राचीनाः पञ्चाशीतिः वैयाकरणाः

प्रवक्तारश्चासन्। एषु वैय्याकरणेषु अष्टौ वैय्याकरणा अतीव प्रसिद्धाः आसन्। वोपदेवेन ''कविकल्पद्रुमस्या-रम्भे'' उल्लिखिता अष्टशाब्दिकाः ते च-

**इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**
**पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः।।**

जयादित्यवामनाभ्यां विरचितायां काशिकावृत्तौ पञ्चानां व्याकरणानां प्राप्यते उल्लेखः। तानि च ऐन्द्रं, चान्द्रं, पाणिनीयं काशकृत्स्नम् आपिशलञ्च स्युः।

अद्यावधि रचितानि व्याकरणानि त्रिषु भागेषु विभक्तुं शक्यन्ते।

1. छान्दसमात्रम् (प्रातिशाख्यादि)
2. लौकिकमात्रम् (कातन्त्रादि)
3. लौकिकं वैदिकञ्चोभयविधम्
(आपिशलपाणिनीयादि)

इत्थमेव व्याकरणप्रवक्तृणामपि विभागः द्विधा कर्त्तुं शक्यते।

1. पाणिनितः प्राचीनाः वैय्याकरणाः।
2. पाणिनितोऽर्वाचीनाः वैय्याकरणाः।

प्राचीनाश्च शाकटायनः, आपिशलिः, गार्ग्यः, गालवःभरद्वाजः, सेनकः, स्फोटायनः, काश्यपादयः। अर्वाचीनाश्च चन्द्रगोमी, देवनन्दी, वामनादयः।

अस्यामेव परम्परायां विद्वद्वरवरदराजाचार्यः अपि विभ्राजते। एतेन लघुसिद्धान्त-सारसिद्धान्तकौमुदीति कृतमस्ति।

सूत्रभेदाः

''**व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्**'' यस्मिन् शास्त्रे शब्दसाधुत्वस्य प्रतिपादनं क्रियते तत् शास्त्रं व्याकरणशास्त्रं निगद्यते। महाभाष्यानुसारं- ''लक्ष्यलक्षणे व्याकरणम्'' एतत् व्याकरणस्य लक्षणम् लक्ष्यम् उदाहरणं। लक्षणं सूत्रम्-

1. **अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।**
   **अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।**
2. **संज्ञा च परिभाषा च विधिर्नियम एव च।**
   **अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।**

**1. संज्ञा सूत्रम्** - यत् सूत्रं संज्ञिनः ज्ञानं कारयति तत् सूत्रं संज्ञासूत्रं यथा- वृद्धिरादैच्, अदेङ्गुणः इत्यादि।

**2. परिभाषासूत्रम्** - ''अनियमे नियमकारिणी परिभाषा'' यथा- तस्मिन्निति निर्दिष्टे पूर्वस्य। अलोऽन्त्यस्य इत्यादि।

**3. विधिसूत्रम्**- यत् सूत्रं- कार्यादेः विधानं करोति तत् सूत्रं विधिसूत्रं कथ्यते। ''आदेशादिविधायकं सूत्रं विधिसूत्रम्'' यथा- आद्गुणः, वृद्धिरेचि, इको यणचि इत्यादि।

**4. नियमसूत्रम्**- ''प्राप्तस्य विधेः नियामकं सूत्रं नियमसूत्रम्।'' यथा- रात्सस्य।

**5. अतिदेशसूत्रम्**- ''अतस्मिन् तद्धर्मापादकं सूत्रम् अतिदेशसूत्रम्''। यथा- स्थानिवदादेशोऽनल्विधौ।

**6. अधिकारसूत्रम्**- ''उत्तरोत्तरसूत्रेषु स्वघटक-पदसमर्पकं सूत्रम् अधिकारसूत्रम्''। यथा- स्त्रियाम्।

**वार्तिकम्** -

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा विचक्षणाः।।**

**भाष्यम्**-

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।**

यत् सूत्रं संज्ञिनः ज्ञानं सूचयति तत् सूत्रं संज्ञासूत्रं कथ्यते।

**ग्रन्थस्य स्वरूपम्**

अस्य शोधप्रबन्धस्य भागत्रयं मया कृतम्। प्रथमो भागः समीक्षात्मकः वर्तते। अस्मिन् भागे उपोद्घातः ग्रन्थकारस्य तत्कृतीनाञ्च परिचयः सम्बद्धसाहित्य-सर्वेक्षणं च वर्तते।

द्वितीयो भागः सम्पादन-भागः वर्तते। अस्मिन् भागे अस्य ग्रन्थस्य सम्पादनं वर्तते।

तृतीयो भागः अनुबन्धात्मकः वर्तते। अस्मिन् भागे परिशिष्टानि वर्तन्ते।

प्रथमेऽध्याये उपोद्घातः वर्णितः।

द्वितीयेऽध्याये ग्रन्थकारस्य परिचयः वर्तते।

तृतीयेऽध्याये सम्बद्धसाहित्यस्य-सर्वेक्षणं वर्तते।

चतुर्थेऽध्याये पाण्डुलिपिविवरणं वर्णनञ्च वर्तते।

पञ्चमेऽध्याये सम्पादनं वर्तते।

षष्ठेऽध्याये सारसिद्धान्तकौमुद्याः समीक्षात्मकम-ध्ययनं वर्तते।

**4. ग्रन्थसमीक्षा-सारसिद्धान्तकौमुदी-लघुसिद्धान्त-कौमुदी-**

अस्य ग्रन्थस्य अन्ते स्वरशब्दानां साधुत्व-ज्ञानाय लिखितम् अस्ति। ''वैयाकरणसिद्धान्तकौमुदी'' ग्रन्थस्य अध्ययनं कठिनं वर्तते प्रारम्भिकछात्राणां कृते। अस्य ज्ञानार्थं वरदराजाचार्येण लघुसिद्धान्त-कौमुदी रचिता। अत्र 1275 सूत्राणि रक्षितानि। सारसिद्धान्त-कौमुदी वरदराजाचार्य महोदयेन द्वयोः कौमुदी-ग्रन्थयोः छात्रेभ्यः अनुभूय रचिता। अत्र 688 सूत्राणि रक्षितानि। 62 वार्तिकानि विरचितानि। अस्य ग्रन्थस्य अध्ययनं सामान्य छात्रोऽपि एकवर्षे कर्तुं शक्नोति। ग्रन्थोऽयं संक्षिप्तः वर्तते।

**5. निष्कर्षः**

एतावता सारसिद्धान्तकौमुद्याः समीक्षात्मकम् अध्ययनं मया कृतम्। अस्य ग्रन्थस्य अध्ययनं बालानां सुखबोधाय भविष्यति इति मे विश्वासः। अनुद्घाटिता-प्रकाशितमातृकाणां सम्पादनं मया अत्र कृतम्। अनेन सम्पादनेन नष्टप्राय मातृकाणां संरक्षणं प्रकाशनं च मया कृतम्। सम्पादनमिदं भाविसन्ततेः कृते उपयोगि भविष्यतीति मे दृढो विश्वासः।

**शोधच्छात्रः,**
**व्याकरण-विभागे, जरारासंविवि, जयपुरम्।**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 120/-, पंचवर्षीय शुल्क 500/-, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारती**

खाता संख्या - **2139101912502**

**IFS Code - CNRB0002139**

नारी-स्तम्भः

# राष्ट्रपूजिका-सत्यवती

❑ डॉ. राजेश्वरीभट्ट



आजीवनं राष्ट्रहिताय समर्पिता शक्तेः प्रतिमूर्तिः सत्यवती राष्ट्रभक्तेषु सर्वदा स्मरणीया विद्यते। ई. 1907 तमे दिल्लीनगरे जाता सत्यवती आर्यसमाजे बहुश्रुतस्य राष्ट्रहिते त्यक्तदेहस्य 'स्वामिश्रद्धानन्दस्य' महोदयस्य पुत्र्यासीत्। स्वामिश्रद्धानन्दो मनसा वाचा कर्मणा निष्ठावान् राष्ट्रभक्त आसीत्। तस्य शिरासु राष्ट्रभक्तिरक्तं सततं प्रवहति स्म। स्वामि-श्रद्धानन्दस्य गृहं राष्ट्रविमर्शकानां कृते प्रेरणास्थलमासीत्। तस्य गृहद्वाराणि राष्ट्रप्रेमिणां कृते सर्वदोद्घाटितान्यासन्। अहर्निशं राष्ट्रस्वाधीनतायै कृतसंकल्पानां त्यागमूर्तीनां स्वसुखनिरभिलाषिणां राष्ट्रहितचिन्तकानां महत्संकल्पेन प्रेरिता सत्यवती राष्ट्रभक्तिमार्गं स्वीकृतवती। 1923 तमे सत्यवत्याः पिता स्वामी श्रद्धानन्दः साम्प्रदायिकसंघर्षे प्राणानुत्ससर्ज। पितुर्निधनानन्तरं तस्य अपूर्णं स्वप्नं पूरयितुं पुत्री सत्यवती आत्मानं स्वाधीनतासंघर्षे योजितवती।

1930 तमे सत्यवती प्रथमवारं सार्वजनिकसभायां मञ्चेन सत्याग्रहान्दोलनस्य सातत्यं प्राणेभ्योऽधिकं प्रतिपादितवती। अत्र सा प्रेरणास्पदैर्वचनैः आन्दोलनस्य सफलतायै विराट्जनसंकुलं प्रेरयामास। आत्मनो लक्ष्याय गतिं दिशञ्च प्रदातुं सत्यवत्या अनेकाः सभाः आयोजिताः, संघर्षयात्राणां नेतृत्वं कृतं, विदेशिवस्त्राणां दाहनञ्च कृतम्। किमधिकं महिलासंघटनानां समर्थनं प्राप्य सत्यवती विदेशनिर्मितानि वस्त्राणि धारयित्वा स्नानार्थं यमुनातटे गच्छन्तीनां महिलानां मार्गं रुरोध। 12 मई 1930 तमे स्वाधीनतासंघर्षे त्यक्तजीवनस्य 'अमीलाल' नाम्नः कस्यचिदान्दोलनकारिणः शवं दृष्ट्वा क्रोधेन ज्वलन्ती सत्यवती अत्याचाराणां विरोधे कटुवचनान्यवदत्। परिणामतः सर्वकारेण सत्यवती षण्मासाय कारागृहे प्रेषिता। न्यायालये श्रावितं दण्डं, दण्डावधिञ्च श्रुत्वाऽपि विगतभया सत्यवती तत्रोपस्थिते विराड्जनसंकुलमध्ये विदेशिशासनान्मुक्तिमधिगन्तुम् उच्चैरुद्घोषं कृतवती। सत्यवत्या मतेन यावद् राष्ट्रे एकोऽपि बालको बालिका वा प्राणान्धारयति तावत् सा विश्रामं न लप्स्यते। 1932 तमे वर्षे शासनविरोधि-क्रियाकलापैः सत्यवती पुनः कारागृहे प्रेषिता। इदानीं कारागृहे जाताभिरसुविधाभिः सत्यवती क्षयरोगेण ग्रस्ताऽभवत्। एवंगतेऽपि सा राजनैतिकगतिविधि-भिरभिन्नाऽऽसीत्। 1937 तमे वर्षे सर्वकारविरोधिकार्यैः सत्यवती पुनः बन्दिनी जाता, सहैव रक्षाकर्मिभिः प्रहारैः प्रताडिता। द्विवर्षानन्तरं कारागृहान्मुक्ता सत्यवती पुनः स्वसंकल्पं साधयितुं प्रवृत्ता जाता। 1938 तमे वर्षे पञ्जाब-प्रान्ते समायोजिते सम्मेलने सत्यवती शासन-तन्त्रस्य विरोधे हृदयशूलकराणि कानिचिद् वचनान्यब्रवीत्। सर्वकारः तत्कालप्रभावेण सत्यवत्याः कृते पञ्जाबप्रान्ताद् निष्कासनस्य आदेशं प्रसारितवान्। मानधना सत्यवती सर्वकारस्यादेशं न स्वीचकार। सर्वकारस्यावमाननां कुर्वती सत्यवती पुनः कारागृहे प्रेषिता। सम्प्रति अस्वस्थताया गम्भीरावस्थां दृष्ट्वा शासनेन सा बन्धनमुक्ता कृता। मृत्योर्द्विदिवसपूर्वं सत्यवत्याः स्वास्थ्यसमाचारान् ज्ञातुं जवाहरलालनेहरू-महोदयश्चिकित्सालयमागच्छत्। ततः सत्यवत्या कथितं

**यत् स्वतन्त्रभारतदर्शनमेव तस्या अन्तिमेच्छा वर्तते। जीवनस्यावसानसमयेऽपि राष्ट्रस्योदयं काङ्क्षन्त्यो नार्यः अस्माभिः सर्वदा स्मरणीया वर्तन्ते।**

**हिन्दी अनुवाद**

आजीवन राष्ट्र के हित के लिए समर्पित, शक्ति की प्रतिमूर्ति सत्यवती राष्ट्रभक्तों में सर्वदा स्मरणीय है। सन् 1907 में दिल्ली नगर में उत्पन्न सत्यवती आर्यसमाज के प्रतिष्ठित राष्ट्र की रक्षा के लिए प्राणों का बलिदान देने वाले स्वामी श्रद्धानन्द की पुत्री थी। स्वामी श्रद्धानन्द मन वचन कर्म से नैष्ठिक राष्ट्र भक्त थे। उनकी शिराओं में राष्ट्रभक्ति का रक्त वेग से बह रहा था। स्वामी श्रद्धानन्द की निवास स्थली राष्ट्रहित चिन्तकों के लिए प्रेरणास्थली के समान थी। श्रद्धानन्द जी के घर के द्वार राष्ट्र भक्तों के लिए सर्वदा खुले हुए थे। रात दिन राष्ट्र की स्वाधीनता के लिए कृतसंकल्प त्यागमूर्ति तथा अपने सुखों से विमुख राष्ट्रप्रेमियों के उदात्तचिन्तन से प्रेरित सत्यवती ने भी राष्ट्रभक्ति के मार्ग पर प्रयाण किया। 1923 ई. में सत्यवती के पिता स्वामी श्रद्धानन्द ने साम्प्रदायिक संघर्ष में अपने प्राणों का बलिदान किया। पिता के निधन के पश्चात् पिता के अधूरे स्वप्न को साकार करने के लिए सत्यवती स्वाधीनता संघर्ष में पूर्णतः संलग्न हो गई।

1930 ई. में सत्यवती ने पहली बार सार्वजनिक सभा में सत्याग्रह आन्दोलन की सफलता को प्राणों से भी अधिक महत्वपूर्ण बताया। इस सभा में सत्यवती ने अपने प्रेरणापूर्ण भाषण से विराट् जनसमूह को प्रेरित किया। सत्याग्रह आन्दोलन को गति प्रदान करने के लिए सत्यवती ने अनेक सभाओं का आयोजन, जुलूसों का नेतृत्व तथा विदेशी वस्त्रों की होली जलाई। यहाँ तक कि विदेशी वस्त्र धारण करने वाली, यमुना के किनारे स्नान करने के लिए आने वाली महिलाओं के मार्ग को भी महिला संगठनों के साथ जाकर रोक दिया। 12 मई 1930 ई. में स्वाधीनता संघर्ष में मारे गए अमीलाल नामक आन्दोलनकर्त्ता के शव को देखकर क्रोध से जलती हुई सत्यवती ने अत्याचारियों के विरोध में कटुशब्द बोले। परिणाम स्वरूप सत्यवती को सरकार ने 4 महीने के लिए जेल की सजा दी। न्यायालय में सुनाये गये दण्ड एवं दण्ड की अवधि के विषय में सुनकर भी निर्भीक सत्यवती ने न्यायालय परिसर में ही जनसमूह के मध्य विदेशी शासन से मुक्ति पाने के लिए शंखनाद किया। सत्यवती के अनुसार जब तक राष्ट्र में एक बालक अथवा एक बालिका भी जीवित है तब तक सत्यवती अपने लक्ष्य से रुकेगी नहीं। 1932 ई में सरकार विरोधी गतिविधियों के कारण सत्यवती को पुनः कारागृह में भेज दिया। इस बार कारागृह में प्राप्त कष्टों के कारण सत्यवती क्षय रोग से ग्रस्त हो गई। फिर भी उसने सरकार विरोधी कार्यों से मुहँ नहीं मोड़ा। 1937 ई. में सत्यवती शासन-विरोधी क्रिया-कलापों के कारण पुनः जेल भेज दी गई। साथ ही पुलिस के द्वारा उस पर प्रहार भी किया गया। दो वर्ष पश्चात् कारागृह से लौटकर सत्यवती पुनः अपने संकल्प को पूर्ण करने में जुट गई। 1938 ई. में पंजाब प्रान्त में आयोजित सम्मेलन में सत्यवती ने सरकार के विरोध में कटुवचनों का प्रयोग किया। क्रुद्ध सरकार ने तत्काल प्रभाव से सत्यवती का पञ्जाब प्रान्त से निष्कासन और फिर कभी पंजाब में प्रवेश न करने का आदेश दिया। मानधना सत्यवती ने सरकार के आदेश को मानना स्वीकार नहीं किया। अपने आदेश की अवमानना करने के कारण सरकार ने सत्यवती को पुनः कारागार में भेज दिया। इस बार सत्यवती कारागार में बहुत बीमार हो गई। सत्यवती की गम्भीर अवस्था को देखकर सरकार ने उसे बन्धन मुक्त कर दिया। दिनों दिन बहुत बीमार सत्यवती क्रमशः क्षीण हो रही थी। मृत्यु के दो दिन पूर्व पं. जवाहरलाल नेहरू सत्यवती के स्वास्थ्य समाचार जानने के लिए चिकित्सालय में आए थे। सत्यवती ने उनसे कहा कि स्वतन्त्र भारत का दर्शन करना ही उसकी अन्तिम इच्छा है। अपने जीवन के अवसान के समय पर भी राष्ट्र का उदय चाहने वाली नारियाँ हमारे लिए सदैव स्मरणीय हैं।

-सी-276, भाभामार्ग, तिलकनगर, जयपुर

आयुर्वेद-स्तम्भः

# कुमारी भेदनी शीता

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**कानिचिद् द्रव्याणि विशिष्टप्रभावात्मकानि भवन्ति। तानि हि रसगुणवीर्यविपाकानतिरिच्य विशिष्टं कार्यं कुर्वन्ति। कुमारी वीर्ये तु शीता भवति तथा विशेषरूपेण भेदनी भवत्यत एव कोष्ठान्मलं भित्वा बहिः निःसारयति। यद्यपि वीर्ये शीता विद्यते पुनरप्यार्तवप्रवर्तनी भवत्यस्मात्कारणात् रजःकृच्छ्रे ऽस्याः प्रयोगः श्रेष्ठो वर्तते। गर्भिणीषु त्वस्याःप्रयोगः कस्मिंश्चिदपि रूपे न करणीयः। मधुररसात्मिका ह्येषा वृष्या भवति, बल्या कुमारिका मोदकादि-रूपेण सेव्यमाना रसायनस्वरूपिणी भवति। पूर्वस्मिँल्लेखेऽस्याः कतिपयप्रयोगाः समुल्लिखिताः। अत्र केषांचिदन्येषां व्यावहारिकाणां सरल-स्वरूपाणां च प्रयोगाणामुल्लेखः क्रियते।**

कुछ द्रव्य विशिष्ट प्रभाव वाले होते हैं। वे द्रव्य रस-गुण-विपाक को अतिरिक्त करके (छोड़कर इनके अतिरिक्त) विशिष्ट कार्य को करते हैं। ग्वारपाठा वीर्य में तो शीत होता है तथा विशेष रूपसे भेदन करने वाला (मल को तोडने वाला) होता है इसलिए कोष्ठ से मल का भेदन करके उसको बाहर निकालता है। यद्यपि वीर्य में शीत हैं फिर भी आर्तव को प्रवृत्त करने वाला होता है इसलिए रजःकृच्छ्र में इसका प्रयोग श्रेष्ठ है। गर्भिणियों में तो इसका प्रयोग किसी भी रूप में नहीं करना चाहिए। मधुर रस वाला यह ग्वारपाठा वृष्य (सम्भोगशक्ति बढाने वाला) होता है। बलकारक यह ग्वारपाठा लड्डू आदि के रूप में सेवन किया जाता हुआ रसायनस्वरूप वाला होता है। इससे पहले वाले लेख में इसके कुछ प्रयोग कहे गए थे। यहाँ कुछ अन्य व्यावहारिक और सरल स्वरूप वाले प्रयोगों का उल्लेख किया जा रहा है।

**अन्यः शाकात्मकः प्रयोगः -**

**100 ग्रामपरिमितानि मेथिकाबीजानि गृहीत्वा जले किञ्चित्कालपर्यन्तमार्द्राणि विधातव्यानि। सम्यगार्द्री - भूतान्युत्फुल्लानि तानि गृहीत्वा कुमारिकायाः पत्रद्वयात् निःसरितायां मज्जायां सम्मिश्र्य शाक-विधिना शाकनिर्माणं करणीयम्। व्यञ्जनात्मके शाकेऽस्मिन् यथामात्रं लवण-मरिच-हरिद्रा-धान्यक-हिंग्वित्यादीनां यथान्यायं प्रक्षेपणं करणीयम्। पूर्वं स्नेहम् (घृतं तैलं वा) उष्णीकृत्य जीरकबीजानि प्रतप्ते तस्मिन् स्नेहे प्रक्षिप्य कुमारिकामज्जाः मेथिकाबीजान्यपि च तत्र प्रक्षिप्य सम्यग् भर्जनं करणीयम्। पश्चादेव लवणादीनां प्रक्षेपणं समुचितम्। व्यञ्जनेऽस्मिन् पृथग् रूपेण स्विन्नीकृतानां मेथिकाबीजानामपि ग्रहणं कर्तुं शक्यते। एवं करणे मेथिकाबीजानामार्द्रीकरणस्या-वश्यकता न वर्तते। व्यञ्जनेऽस्मिन् छुहारा-नामधेयानां शुष्कपिण्डखर्जूराणां खण्डानि तथा किसमिसनामधेयानां क्षुद्रद्राक्षाफलानां संशुष्कानां प्रक्षेपणं करणीयम् शुष्कस्यामाम्रस्य खण्डानि स्वल्प-मात्रात्मिका च शर्करापि प्रक्षेप्या वर्तते।**

एक सौ ग्राम की मात्रा में मेथी के बीजों को लेकर कुछ समय तक भिगोकर रखने चाहिए। अच्छी प्रकार गीले हुए तथा फूले हुए उन मेथीबीजों को लेकर ग्वारपाठा के दो पत्रों (पाठों) से निकले हुए गूदे में (इन बीजों को) मिला कर शाक बनाने की विधि से शाक (शाकनामक व्यञ्जन) बनाना चाहिए। व्यञ्जनस्वरूपक इस शाक में उचित मात्रा में नमक, मरिच (लाल), हल्दी, धनिया और हींग विधिपूर्वक डालना चाहिए। पहले स्नेह (घी या तैल) गर्म करके उस प्रतप्त स्नेह में

जीरा डालकर ग्वारपाठे का गूदा तथा मेथी के बीजों को उसमें डालकर अच्छी प्रकार से भूनना चाहिए। बाद में ही नमक इत्यादि का डालना उचित है। इस व्यञ्जन में पृथक् रूप से उबाले गए मेथी के बीजों को भी लिया जा सकता है। ऐसा करने में मेथी के बीजों को भिगोने की आवश्यकता नहीं रहती। इस व्यञ्जन (शाक) में छुहारा नामक सूखे पिण्डखर्जूरों के टुकडों को तथा किसमिस नामक छोटे सूखे द्राक्षाफलों को डालना चाहिए सूखे कच्चे आम के टुकडों (अमचूर) को भी तथा थोडी मात्रा में शक्कर भी इसमें डालनी चाहिए।

**औषधात्मकः पेयः -**

**200 मिलिलिटरपरिमाणात्मकं सुपूतं कुमारिकास्वरसं गृहीत्वा तत्र 50 ग्रामपरिमितं मधु प्रक्षिप्य सम्यग् विमिश्र्य निधातव्यम्। अस्मिन् द्रवे शुण्ठी-मरिच-पिप्पली-हरीतकी-विभीतक-आमलकी-त्वग्-एला-पत्र-लवंगेत्येतानां दश-द्रव्याणां सम्मिलितानां विंशति-ग्रामात्माकानां (पृथक्-पृथक् रूपेण ग्रामद्वयात्मकानां) संशुष्कं सुकुट्टितं वस्त्रपूतं चूर्णं गृहीत्वा सम्यक् संमिश्रणं करणीयम्। सुशीते स्थाने (फ्रिज इत्याख्ये वा) संस्थापनीय एषः पेयः। प्रातःकाले सायङ्काले च प्रतिवारं 25 मि.लि. मात्रायां पातव्यो ह्येषः पेयः। विबन्धघ्नः सुपाचकः बल्य उदावर्तहरो ह्येषः पेयः। उपर्युक्तमात्रायामेवास्य निर्माणं विधेयम्। अधिकमात्रायां निर्माणेनाधिक-दिनपर्यन्तं स्थित एषः पेयः व्युषितो विकृतश्च भवति।**

**औषधस्वरूपक पेय -**

200 मि.लि. की मात्रा में अच्छी प्रकार से छने हुए ग्वारपाठा के रस को लेकर उसमें 50 ग्राम शहद डालकर अच्छी तरह मिलाकर रख दे। इस द्रव में सोंठ, मरिच, पीपल, हरड़, बहेड़ा, आँवला, दालचीनी, इलायची, तेजपत्ता और लवंग इन दश सम्मिलित 20 ग्राम द्रव्यों का (पृथक् पृथक् रूप से प्रत्येक द्रव्य का 2 ग्राम) सूखा, अच्छी तरह कुटा हुआ, कपड़े से छना हुआ चूर्ण लेकर अच्छी प्रकार से मिला ले। यह पेय ठण्डे स्थान पर (या फ्रिज में) रखना चाहिए। प्रातःकाल और सायङ्काल प्रत्येक वार ये पेय 25 मि.लि. की मात्रा में पीना चाहिए। विबन्ध (कब्ज) को नष्ट करने वाला, सुपाचक, बलकारक, उदावर्त (पेट में भरी हुई वायु) को दूर करने वाला होता है यह पेय। इसका निर्माण ऊपर बताई हुई मात्रा में ही करना चाहिए। अधिक मात्रा में निर्माण करने से अधिक दिन तक रखा हुआ यह पेय बासी हो जाता है और खराब हो जाता है।

**अन्यः पेयः-**

**100 मि.लि. परिमितः कुमारिकास्वरसः, 100 ग्रामपरिमितं दधि, 20 मि.लि. परिमितः आमलकीस्वरसः 20 ग्रामपरिमितञ्च मधु संयोज्य खजेन सम्यग् विमथ्य प्रातःकालेऽनन्नभुक् पिबेत्। ये हि यकृद्विकृतिग्रस्ताः सन्ति तैस्त्वत्र 20 मि.लि. गोमूत्रमपि सद्यो गृहीतमेव विमिश्र्य पातव्यम्। अथवा तावन्मात्रमर्धमात्रं वाऽर्कगोमूत्रमत्र विमिश्रणीयम्। अनेन यकृद्विकृतेरपाकरणं भवति रक्तकणानां विशेषेण विनिर्मितिर्भवत्यत एव रक्ताल्पतायाममृता-त्मकस्त्वेषः पेयः। जाठराग्नेरभिवृद्धिकारको ह्येषः पेयः वातस्यानुलोमनं करोति, मलं भिनत्त्यत एव विबन्धघ्नोऽस्ति। कृमिनाशकः रुचिकारकः बल्यश्च एषः पेयः सर्वर्तुषु सेवनीयो वर्तते।**

**अन्य पेय-**

100 मि.लि. ग्वारपाठे का रस, 100 ग्राम दही, 20 मि.लि. आँवले का रस तथा 20 ग्राम मधु इन सबको एकत्र मिलाकर मथनी से अच्छी प्रकार मथकर प्रातः काल बिना कुछ खाए (खाली पेट ही) इसको पीवे। जो लोग यकृद् विकार से पीड़ित हैं उन्हें तो इसमें ताजा गोमूत्र 20 मि.लि. की मात्रा में मिलाकर पीना चाहिए।

अथवा उतनी ही मात्रा (20 मि.लि.) में या आधी मात्रा में (10 मि.लि.) अर्क गोमूत्र इसमें मिलाना चाहिए। इससे यकृद् विकृति दूर होती है, विशेष रूप से रक्तकणों का निर्माण होता है अतः यह पेय रक्ताल्पता में अमृत के समान है। जाठराग्नि को बढाने वाला यह पेय वायु का अनुलोमन करता है (बाहर निकालता है), मल को तोडता है अतः विबन्धनाशक है। कृमिनाशक, रुचिकारक और बलदायक यह पेय सभी ऋतुओं में सेवन करने योग्य है।

**कुमारी-मोदकाः**

**गोधूमचूर्णं किलोग्रामैकपरिमितं गृहीत्वा तत्र कुमारीस्वरसं यथामात्रं प्रक्षिप्य तच्चूर्णमैकत्र्यं बद्धस्वरूपे कुर्यात्। तदनन्तरं बद्धस्य तस्य चूर्णस्य मुष्टिप्रमाणानि खण्डानि कुर्यात्। तानि खण्डानि चुल्लिकोपरि संस्थिते घृतपूरिते कटाहे प्रक्षिप्याग्नि-माध्यमेन शनैः शनैः मन्द-मन्द स्वरूपेण तेषां पाकं कुर्यात्। विपक्वानि तानि खण्डानि चूर्णयेत्। पुनः पृथग् रूपेण किलोग्रामैकपरिमितां शर्करां सितोपलां वा गृहीत्वा सुपूतां तां पूर्वोक्ते विपक्वे चूर्णे सम्मिश्रयेत्। सम्मिश्रणसमय एव 250 ग्रामपरिमितं घृतमपि तत्र प्रक्षिपेत्। यथालाभं यथेष्टञ्च वातामाभिषुकाक्षोटनिकोचकानां प्रियालफलानां शुष्कफलानां खण्डानि तत्र प्रक्षिप्य मोदकनिर्माणं करणीयम्। प्रतिदिनं जाठराग्न्यनुरूपमेव प्रातः सायं मोदकभक्षणं करणीयम्। कुमारीमोदकाः ह्येते वृष्याः बल्याः रसायनस्वरूपाश्च भवन्ति। हेमन्ते शिशिरे च मात्रापूर्वकंमेतेषां मोदकानां भक्षणं करणीयम्। निरापदाः ह्येते न विशिष्टं पथ्यमपेक्षन्ते पुनरपि तैले तलितानां कटुतीक्ष्णभक्ष्याणां 'कचोरी-पकौडी' इत्याख्यानां सेवनमम्लद्रव्याणां रागशुक्ता-दीनाञ्च सेवनमेतेषां प्रयोगकाले न करणीयम्। तिन्तिडिकायाः प्रयोगस्तु सर्वथा निषिद्धः।**

**कुमारी-मोदक-**

गेहूँ का आटा एक किलोग्राम लेकर उसमें मात्रा के अनुसार (आवश्यकता के अनुसार) ग्वारपाठे का स्वरस डालकर उस चूर्ण (आटे) को एकत्र बाँध लेना (गूँध लेना) चाहिए। उस बँधे हुए आटे के एक मुष्टिप्रमाण के टुकडे (मठिये) कर लेने चाहिए। उन टुकडों को घी से भरे हुए (आधा भरे हुए) चूल्हे पर चढे कुए कटाह (कड़ाही) में डालकर अग्नि के माध्यम से धीरे-धीरे मन्द-मन्द रूप मे उनका पाक करना चाहिए। पके हुए उन खण्डों का (कूट कर) चूर्ण कर लेना चाहिए। फिर अलग से एक किलोग्राम शर्करा या मिश्री को लेकर छान कर इस पूर्वोक्त पके हुए चूर्ण में मिला ले। मिलाते समय ही इसमें 250 ग्रा.घी. डाल देना चाहिए। जो द्रव्य (बता रहे हैं उनमें जो) प्राप्त हो जाय वे बादाम, पिश्ता, अखरोट, चिलगोजा, चिरोंजी इन, सूखे मेवों के टुकड़े उसमें डालकर लड्डू बना लेना चाहिए। प्रतिदिन अग्निबल के अनुसार (जितना आसानी से पच जाय उतना) प्रातःकाल और सायङ्काल यह लड्डू खाना चाहिए। ये ग्वारपाठे के लड्डू वृष्य, बल्य और रसायनस्वरूप वाले होते है। हेमन्त में और शिशिर में इन लड्डूओं को मात्रापूर्वक खाना चाहिए। निरापद इन लड्डूओं के सेवन करते समय किसी विशेष पथ्य की अपेक्षा नहीं रहती, फिर भी तैल मे तले हुए चरपरे और तीक्ष्ण भक्ष्य पदार्थ कचोरी-पकौडी इत्यादि का सेवन तथा खट्टे पदार्थों और चटनी (तथा आचार), सिरका अादि का सेवन इनके प्रयोगकाल में नहीं करना चाहिए। इमली का प्रयोग तो सर्वथा निषिद्ध है।

**अन्ये केचन बाह्यप्रयोगाः -**

**तात्कालिकरूपेण दग्धस्थले कुमारीस्वरसस्य प्रलेपनं हितावहं भवति। दाहनिवारको ह्येषः स्वरसः दग्धव्रणानां रोपणेऽपि समर्थो वर्तते। किन्त्वस्य प्रयोगस्तु दग्धव्रणेषु चिकित्सकेनैव करणीयः।**

**मुल्तानीमृत्तिकाचूर्णं 100 ग्रामपरिमितं चन्दनचूर्णञ्च 10 ग्रामपरिमितं गृहीत्वा यथामात्रं कुमारीस्वरसमत्र संमिश्र्य लेपकल्पना विधेया। ललाटगलकम्बुसहिते सम्पूर्णे मुखेऽस्य लेपस्य लेपनं विधेयम्। किञ्चित्कालानन्तरं सशुष्कं लेपं जलमाध्यमेन क्षालयित्वापसारयेत्। अनेन मुखदूषिकानामरूंषिकानां निवारणं भवति। सौन्दर्यं त्वचः स्वास्थ्यस्य चाभिवर्धनं भवति।**

**कुमारीपत्रं सुपुष्टमेकं गृहीत्वैकतः तस्य त्वचमवदारयेत्। सम्मुखीभूतं तु तं मज्जाभागं पादतले वस्त्रसहायतामाध्यमेन बध्नीयात्। किञ्चित् कालानन्तरं (होरार्धानन्तरं) तं मज्जाभागमपसारयेत्। अनेन पादतलदाहस्य नेत्रदाहस्य च निवृत्तिर्भवति। प्रयोगस्त्वेषः पुनः पुनरपेक्षितः।**

**पीतां मृत्तिकां कलमीशोरानामकञ्च किञ्चिन्मात्रं द्रव्यं गृहीत्वा कुमारी स्वरसमाध्यमेन लेपं विदध्यात्। अस्य लेपस्य लेपनं नाभेरधोभागे करणेन मूत्रकृच्छ्रस्य निवारणं भवति। मूत्रदाहोऽपि निवर्तते।**

**शिरसि कुमरीस्वरसप्रलेपनं शिरःस्थानामरूंषिकानां निवारणं करोति। न खालित्यं न पालित्यं न केशाः प्रपतन्ति च। शिरसः त्वचः संशुष्कतां निवारयत्येषः स्वरसप्रलेपः। अनेन केशाः दृढमूलाः दीर्घाः कृष्णाश्चापि भवन्ति। अनेन कृतार्द्रस्यामुलकीचूर्णेन विनिर्मितस्य कल्कस्यालेपनं शिरसि करणेनाधिकः लाभो भवति।**

**कुछ अन्य बाह्य प्रयोग-**

जले हुए स्थान पर तत्काल ही ग्वारपाठे के रस का लेप हितकर होता है। जलन को दूर करने वाला यह स्वरस जले हुए स्थान के श्रावों को भी जल्दी भरता है। लेकिन जले हुए स्थान के घावों में इसका प्रयोग तो चिकित्सक के द्वारा ही किया जाना चाहिए।

मुल्तानी मिट्टी का चूर्ण 100 ग्राम, सफेद चन्दन का चूर्ण 10 ग्राम लेकर आवश्यकता के अनुसार इसमें ग्वारपाठे का रस मिला कर लेपद्रव्य बना लेना चाहिए। ललाट, गला और गर्दन सहित सम्पूर्ण चेहरे पर इस लेप को लगाना चाहिए। कुछ देर के बाद सूखे हुए लेप को जल के माध्यम से धो कर निकाल देना चाहिए। इससे मुखको (चेहरे को) दूषित करने वाली फुंसियाँ दूर होती है। सौन्दर्य और त्वचा के स्वास्थ्य की वृद्धि होती है (चेहरा दमकता है)।

सुपुष्ट एक ग्वारपाठा लेकर उसके एक तरफ के छिलके को छीलकर उतार देना चाहिए। उस गूदे वाले भाग को सामने की ओर करके वस्त्र की सहायता से पैर के तलु में बाँध देना चाहिए। कुछ काल के बाद (आधा घण्टे के बाद) उस गूदे को हटा देना चाहिए। इससे पैर के तलुओं में होने वाली जलन और आँखों की जलन दूर होती है। इसका प्रयोग बार-बार अपेक्षित है।

पीली मिट्टी और थोड़ा कलमी शोरा लेकर ग्वारपाठे का रस मिलाकर लेप बनाना चाहिए। नाभि के नीचे इस लेप का लेपन करने से मूत्रकृच्छ्र दूर होता है। मूत्र में होने वाली जलन भी दूर होती है।

शिर में ग्वारपाठे के रस का लेप लगाने से शिर में होने वाली छोटी फुंसियाँ दूर होती हैं। इससे गंजापन और बालों का पीला होना भी नहीं होता तथा बाल झडते भी नहीं हैं। यह स्वरस का लेप शिर की त्वचा के सूखेपन को भी दूर करता है। इस से बालों की जड़ें मजबूत होती हैं बाल लम्बे और काले होते हैं। इस रससे आँवले के चूर्ण को गीला करके बनाए गए कल्क (चटनी) का शिर में लेप करने से अधिक लाभ होता है।

**८०, सेनापति हाऊस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17




स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,